॥ ओ३म् ॥

प्राय: कन्दुकपातेनोत्पतत्यार्य: पतन्नपि।
तथा पतत्यनार्यस्तु मृत्पिण्डपतनं तथा। ।।4।।
लभेत सिकतासु तैलमपि यत्नत: पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासर्दित:।
कदाचिदपि पर्यटन्शशविषाणमासादयेन्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।5।।
(नीतिशतकम्)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20

Approved Journal by UGC - No 40484

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

व्यालं बालमृणालतन्तुभिरसौ रौद्धुं समुज्जृम्भते,
छेत्तुं वज्रमणीं शिरीषकुसुमप्रान्तेन सन्नह्यति।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते।
नेतुं वाञ्छति य: खलान्पथि सतां सूक्तै: सुधास्यन्दिभि:।।6।।
(नीतिशतकम्)

卐 वर्षम्-८ 卐 अंक:-२० (१८८) 卐 १६ अप्रैल: २०१९ त: ३० अप्रैलमास: २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७६ 卐 सृष्टिसंवत्-१,९६,०८,५३,११७ 卐 पृष्ठम्-८

## वर्तमानपरिप्रेक्ष्ये श्रीमद्भगवतगीताया: व्यावहारिकी उपयोगिता

–डॉ. कामनाविमलशर्मा

नवदेहली: वैश्विकस्तरेभारतीयज्ञानसम्पदाया:महत्त्वंप्रस्थापयितुंबृहत्तर-वैदिक-अध्ययन-परिषदा (वेव्स) वर्षेऽस्मिन्समायोजितायांपरिचर्चा- श्रृंखलायांप्रथमावेदविषयिकीपरिचर्चासत्यवतीमहाविद्यालये-अभवत्, द्वितीयाश्चअत्यन्तसमसामयिकीपरिचर्चामार्चमासस्य सप्तविंशतितमेदिनांके-श्रीमद्भगवतगीताया:

व्यावहारिकीउपयोगितावर्तमानापेक्षाश्चइतिविषयमा-धृत्यदिल्लीविश्वविद्यालयस्यउत्तरी-परिसरेस्थितेगाँधीभवनस्यसभागारेसमायोजिता।




कार्यक्रमस्यास्यसंचालनंदिल्लीविश्वविद्यालयस्यसंस्कृत-विभागस्यएसोसिएटप्रोफेसरडॉ. रणजीतबेहेरामहोदयेनकृतम्। प्रो. भूदेवशर्मा, संस्थापकाध्यक्ष:, वेव्स (अमेरिका) अस्यायोजनस्यअध्यक्षपदमलंकृतवान्। अमरीकादेशस्यओहायोविश्वविद्यालयस्य-इंजीनियरिंगसंकायस्यप्रो. शिवचतुर्वेदीकार्यक्रमस्यमुख्यवक्तारूपेणविराजित:।परिचर्चाया:मुख्यवक्तार: – सुप्रसिद्धवेदविदुषी, दिल्लीविश्वविद्यालयस्यमैत्रेयीमहाविद्यालयस्यपूर्वाचार्याडॉ.शशितिवारीमहोदया; नेपालदेशत:समागत:संहिताशास्त्रीउपाधिनासम्मानित:डॉ. अर्जुनप्रसादबस्तोलामहोदय:, दिल्लीविश्वविद्यालयस्यसंस्कृतविभागस्यपूर्वाध्यक्ष: गाँधीभवनस्यनिदेशकश्चडॉ. रमेशभारद्वाजमहोदय:, दिल्लीविश्वविद्यालयस्यसंस्कृतविभागस्यैवएसोसिएटप्रोफेसरडॉ. भारतेन्दुपांडेयमहोदय:, दिल्लीविश्वविद्यालयस्यलक्ष्मीबाईमहाविद्यालयस्यसंस्कृतविभागस्यपूर्वाचार्याडॉ. धर्माशर्मा, डॉ. राजेन्द्रकुमारपांडे, लेखक:पूर्वअपरायुक्तश्च, गाजियाबाद: चावर्तन्त।

स्वागतपरम्परायांसर्वप्रथमंश्रीपरमानंदमहोदयेनवैदिकमंगलाचरणंकृतम्, गाँधीमहोदयस्यप्रतिमांप्रतिपुष्पार्पणंकृतम्अतिथिभि:, तदनन्तरमतिथीनाञ्चस्वागतंडॉ. रणजीतबेहेरामहोदयेनपुष्पमालाभि: चअभिहितम्।

विषयप्रवर्तनसत्रेडॉ.शशितिवारीमहोदययागीतायांवर्णितस्यधर्मशब्दस्यतात्विकव्याख्यापेक्षिता

वर्तमानयुगे- इतिउद्घोषितम्। तदनन्तरं, सभायांमुख्यवक्तारूपेणविराजितेनप्रो. शिवचतुर्वेदीमहोदयेनगीतायांवर्णितानांपारिभाषिकशब्दानां-विषाद:, सङ्ग-असङ्ग-कुसङ्ग-सत्सङ्ग:, विद्या-अविद्या, इत्यादीनांवैज्ञानिकव्यावहारिकश्चचिन्तनंप्रस्तुतम्। वैज्ञानिकै: वेदगीताश्चअवश्यमेवज्ञातव्येइत्युद्घोषितम्महोदयेन। स्ववक्तव्येमहोदय: रोबर्टओपेनहोवेर, रोबर्टमिस्ट,

शेषभाग:द्वितीयपुटे

## परशुरामविक्रममिति संस्कृतमहाकाव्यस्य अर्वाचीनसंस्कृताङ्कस्य च लोकार्पणम्

नवदेहली। प्रो.सुधीकान्तभारद्वाज 'कल्प' विरचितस्य परशुरामविक्रममिति संस्कृतमहाकाव्यस्य लोकार्पणं देवीवाणी-परिषदस्तत्त्वावधाने षट्सप्तत्युत्तरद्विसहस्रतमे विक्रमाब्दे तदनुसारं एकोनविशत्युत्तरद्विसहस्रतमे खिष्टाब्दे, अप्रैलमासस्य पञ्चदशतारिकायां मुख्यातिथिभी राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदमलंकुर्वाणै: प्रो.परमेश्वरनारायणशास्त्रिमहाभागै: राष्ट्रियसंस्कृतसंस्थानस्य सभागारे लोकार्पणं कृतम्। अस्य समारोहस्याध्यक्षता परिषदध्यक्षै:




पद्मश्रीविभूषितै: डा.रमाकान्तशुक्लमहाभागैर्निर्व्यूढा।

ग्रन्थप्रणेतृभि: प्रो.सुधीकान्तभारद्वाजमहोदयैर्महाकाव्यस्य परिचयो दत्त:। तैरुक्तं यत्काव्यमिदं एकविंशतिसर्गात्मकमस्ति। संख्येयं परशुरामस्यैकविंशतियुद्धै: संवदते। परशुरामो भारतीयपरम्परायां विष्णोरवतारेषु विशिष्टं स्थानं भजते। भारतवर्षस्यैकराष्ट्ररूपेण संस्थापना तेनैव कृता। तेनैकविंशतिवारं युद्धं कृत्वा दुष्टशासकानां संहारो लोकोपकारायैव कृतो न त्वात्मवैमनस्येन। तैरिदमपि सूचितं यदस्मिन् काव्ये परम्पराया निर्वाह: पूर्णतया कृत:। केवलं घटनानामौचित्यपूर्णसंयोजनायैव कल्पनाया आश्रयो गृहीत:। अत्र परशुरामरूपेण विष्णोरवतारेण सह पद्मेश्वरीरूपेण लक्ष्म्या अवतारोऽपि कल्पित:। यदा विष्णोरवतारोऽत्र ब्रह्मचारिरूपेण वर्तते तदा तस्य सहचर्या लक्ष्म्या अवतारोऽपि ब्रह्मचारिणीरूपेण वर्तते।

मुख्यातिथिभि: प्रो. परमेश्वरनारायणशास्त्रिमहाभागैर्हर्ष: प्रदर्शितो

यदाधुनिककालेऽपि संस्कृतभाषायां महाकाव्यलेखनस्य परम्परा सुतरां जीवति। यदान्यासु भाषासु महाकाव्यलेखनस्य परम्परा लुप्तप्रायाल्पीयसी वा विद्यते, संस्कृतभाषायां महाकाव्यानि साम्प्रतमपि विरच्यन्त इति महत्प्रमोददायकमस्ति। तै: परशुरामविक्रममप्याश्रित्यापि केषुचित्प्रकरणेषु प्रशंसात्मिका: टिप्पण्य: कृता:।

डा. रमाकान्तशुक्लमहाभागैराध्यक्षीये भाषणे स्पष्टीकृतं यत्काव्येऽस्मिन् लक्ष्म्या अवताररूपेण पद्मेश्वरीपात्रस्य कल्पना सर्वथौचित्यपूर्णास्ति यत: नारीं विना पुरुषस्य सत्तापूर्णास्ति। लक्ष्मीर्विष्णो:

शेषभाग:द्वितीयपुटे

## महामहिमराष्ट्रपतिमहोदयेन पुरस्कृता विद्वांसो राष्ट्रपतिभवने सत्कृता:

नवदेहली। भारतस्य उपराष्ट्रपतिमहोदयेन एस.वैंकयानायडुना वर्ष 2016-17-18 संस्कृत-पालि-प्राकृत-अरबी-फारसी-कन्नड-तेलगू-मलयालम भाषाणां 104 विद्वद्ज्ना: सम्मानित:। विदितोऽस्ति यत् मानवसंसाधनविकासमंत्रालय: प्रतिवर्षं पञ्चदश संस्कृतविद्वासं एवं अन्या: भाषाया: विद्वान्सं राष्ट्रपति सम्मानप्रमाणपत्रमेवं बादरायणव्याससम्मानं प्रदीयते। अस्य घोषणा राष्ट्रपति प्रतिवर्षं स्वतंत्रतादिवस्य पूर्व संध्यायां करोति।



# देववाणीपरिषदा प्रकाशितस्य श्रीमदूधमसिंहचरितस्य लोकार्पणम्

2076 वैक्रमाब्दस्य वैशाखीपर्वणि, 14.04.2019 तमे दिनाङ्के जलियाँवालाबागहत्याकाण्डस्य शताब्दपूर्त्यवसरे हुतात्मभ्य: श्रद्धाञ्जलिसमर्पणपुरस्सरं देववाणी परिषदा प्रकाशितस्य



ऋषिराजपाठककृतस्य 'श्रीमदूधमसिंहचरितम्' इति ग्रन्थस्य लोकार्पणं दिल्लीस्थे राजीवनगरस्थे श्रीनारायणधाम्नि संगीताचार्यस्य श्रीमतो राजेन्द्रशर्ममहोदस्य करकमलाभ्यामभूत्। अवसरेऽस्मिन् देववाणीपरिषदोऽध्यक्ष: आचार्यरमाकान्तशुक्ल:, देववाणी परिषत्संरक्षितका श्रीमती रमा देवी शुक्ला, ग्रन्थप्रणेतुर्माता श्रीमती सुनीतापाठकमहोदया, ग्रन्थप्रणेता डॉ. ऋषिराजपाठक:, ग्रन्थस्यङ्लभाषानुवादकर्ता श्रीसत्यार्थग्रोवर:, ग्रन्थस्य पञ्जाबीभाषानुवादकर्त्री डॉ. गुरदीपकौरमहोदया, ग्रन्थस्य रोमनलिप्यन्तरणकर्त्री निधितिवारी, ग्रन्थाय जलियाँवालाबागस्य छायाचित्राङ्कनकर्त्री अदितिमौर्या, ग्रन्थस्य मुखपृष्ठचित्राङ्कनकर्त्री सुमुक्तासिंह:, अन्ये च श्रोतार: जिज्ञासवश्च समुपस्थिता अभूवन्। कार्यक्रमस्य प्रारम्भ: श्रीसत्यार्थग्रोवरकृतेन वैदिकमङ्गलाचरणेन अभूत्। ग्रन्थलोकार्पणकर्त्रा श्रीमता राजेन्द्रशर्मणा श्रीमत उधमसिंहस्य जीवनचरितं वर्णयतास्माकं स्वातन्त्र्यसमराङ्गणसंघर्षगाथा संक्षिप्य रेखाङ्किता। ऋषिराजपाठकेनापि जलियाँवालाबागहत्याकाण्डस्य शताब्दयूर्त्र्वसरेऽस्य ग्रन्थस्य प्रकाशनप्रसङ्गिकता प्रतिपादिता। परिषदध्यक्षेण श्रीमताचार्यरमाकान्त शुक्लेनापि जलियाँवालाबागस्य हत्याकाण्डकथा श्राविता। सत्यार्थग्रोवरेणास्य ग्रन्थस्य प्रासङ्गि कथाप्रकटपुरस्सरं न्यगादि यत् श्रीमत उधमसिंहस्य व्यक्तित्वमधिकृत्य एतादृशकाय संस्कृतादिभाषासु ऐदंप्राथभ्येनास्ते। ग्रन्थकर्तुमत्रिपि श्रीमत्या सुनीतापाठकमहो हृदयाऽस्य ग्रन्थस्य वैशिष्टयं प्रत्यपादि। अथान्ते च परिषत्सारंक्षिकया श्रीमत्या रमादेवीशुक्लया ग्रन्थस्य विविधभाषानुवादसोविध्ये जनानां चर्चितम्। कार्यक्रमस्यास्योद्देश्यं हुतात्मवीरेभ्य: श्रद्धाञ्जलिसमर्पणमासीत्। अस्य पञ्जावीभाषानुवादकर्त्र्यापि डॉ. गुरदीपकौरहाभागया ग्रन्थविषये स्वविचारा: प्रकटिता:।

# रामजसमहाविद्यालये द्विदिवसीयाराष्ट्रीयसंगोष्ठी संपन्ना

विगतदिवसे दिनांक 15-16मार्च 209तमेखीष्ताब्दे रामजसमहाविद्यालय दिल्लीविश्वविद्यालये द्विदिवसीया राष्ट्रीयसंगोष्ठी सम्पन्ना। अस्या: संगोष्ठ्या: मुख्यविषय: संस्कृतस्यवैश्विकपरिदृश्यमासीत्। विषयोऽयं दिल्लीविश्वविद्यालयस्य संस्कृतस्नातकविशेषपाठ्यक्रमेषु संबद्ध:। अस्मिन् संगोष्ठ्यां भारतराष्ट्रस्य विभिन्न संस्थाषु विश्वविद्यालयस्य तथा च महाविद्यालयस्य नैकेविद्वांस: समुपस्थिता: आसन्। अस्य संगोष्ठ्या: उद्घाटनं मुख्यातिथिरूपेण राष्ट्रियसंस्कृतसंस्थानस्य सम्मान्य कुलपतय: आचार्य परमेश्वर नारायण शास्त्री महोदय: कृतवन्त:। संगोष्ठ्यास्यास्य उद्घाटनावसरे आधुनिक कवि, काव्यशास्त्री, मूर्द्धन्य विद्वान् सम्पूर्णानन्द विश्वविद्यालयस्य पूर्वकुलपतय: श्रीमन्त: आचार्य राजेन्द्रमिश्र महाभाग: उपस्थितासन्। तस्य मुख्य वक्तव्यं संस्कृतस्य वैश्विक परिदृश्यं श्रु त्वा छात्र-छात्रा: प्राध्यापकाश्च अभिभूतो जात:। प्रथमदिवसस्य अवसरेऽस्मिन् संस्कृत विभाग, दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा आचार्या शारदाशर्मा तथा च रामजसमहाविद्यालयस्य प्राचार्य: अपि उपस्तिथा: आसन्। अन्येऽपि विद्वान्स: यथा- संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान, जवाहरलालनेहरूविश्वविद्यालयस्य आचार्य सन्तोषकुमारशुक्ल:, रामजसमहाविद्यालयस्य अवकाश प्राप्त आचार्य: डॉ0 मोहनचन्दतिवारिण:, आचार्या डॉ0 शरदलताशर्माण: तथा च संस्कृतविभाग दिल्लीविश्वविद्यालयस्य आचार्य: डॉ0 दयाशंकर तिवारी, आचार्या डॉ0 मीराद्विवेदी महाभागा, डॉ0 विजयशंकरद्विवेदी तथा च डॉ0 एम0 किशन महाभागादय: स्वकीयेनवक्तव्येन संस्कृतसाहित्यस्य वैश्विकस्वरूपमुद्घाटितवन्त:।

संगोष्ठ्या: द्वितीयेदिवसेऽपि अनेके विद्वांस: यथा बौद्धाध्ययनविभाग गौतमबुद्धनगरविश्वविद्यालय, नोएडा, उश्रर प्रदेशस्य आचार्य: डॉ0 चन्द्रशेखरपासवान महाभाग: तथा च संस्कृतविभाग एमिटीविश्वविद्यालयस्य डॉ0 देवेन्द्रनाथओझा महाभागादय: स्वीयंमतं विषयेऽस्मिन् उद्घाटितवन्त:। अस्या: संगोष्ठ्या: समापने सत्रे श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य सम्मानित कुलपतय: आचार्य रमेशकुमारपाण्डेय:, प्रकाशनविभागस्य अध्यक्ष: आचार्य शिवशंकरमिश्र: तथा च राष्ट्रियसंस्कृतसंस्थान दिल्ली इत्यस्य मुक्तस्वाध्यायपीठस्य निदेशक: आचार्य: रमाकान्तपाण्डेय महाभागादय: विदेशेषु ये संस्कृतभाषाया: काव्यरचनाकारा: आसन् तेषु विषयेषु सविस्तरं व्याख्यानं प्रदश्रवन्त:। दिल्लीविश्वविद्यालयस्य नैके छात्रछात्रा: तथा च प्राध्यापका: समुपस्थिासन् अपितु अधिक संख्याया: समुपस्थितं भूत्वा ते अस्य संगोष्ठ्या: साफल्यं व्यरचयन। अस्मिन् सफ्ल संगोष्ठ्यां संस्कृतविभाग रामजसमहाविद्यालयस्य वरिष्ठ आचार्य: डॉ0 पी. के. पण्डा महाभाग:, संगोष्ठी संयोजक: डॉ0 राजमंगल यादव:, विभागस्य अन्य सदस्य डॉ0 सुनीता मीना, डॉ0 वीरेन्द्र कुमार:, श्रीरामेश्वर:, श्रीविजेन्द्र आर्य, संस्कृतविभागस्य अध्यक्ष: डॉ0 साहिबसिंह महोदय: तथा च रामजसमहाविद्यालयस्य सर्वे छात्रछात्रा: अपि च अन्य महाविद्यालयस्य छात्रछात्रा: समुपस्थितासन्। अस्मिन् संगोष्ठिषु अनेके शोधच्छात्रा: प्राध्यापकाश्च मुख्यविषमधिकृत्य विविधशोधपत्रं प्रस्तुतवन्त:।

# उमेशनेपालमहोदया: बादरायणव्याससम्मानेन अलंकृता:

वार्ताहर: डॉ.कमल-कान्त-बालाण:

जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृत-विश्वविद्यालय-जयपुरस्य साहित्यविभागस्य सहायकाचार्या:, लब्धप्रतिष्ठा: साहित्य-न्याय-वेदान्ताचार्या: डॉ.उमेशनेपालमहोदया: भारतसर्वकारस्य मानवसंसाधनमंत्रालयेन



महर्षिबादरायणव्याससम्मानेन अलंकृता:।

पुरस्कार: अयं नवदेहल्यां गुरुवासरे 'अशोकहोटल' इत्यस्मिन् स्थले आयोजिते कार्यक्रमे उपराष्टपतिमहोदयै: श्रीमद्भि: वैंकेया-नायडूमहोदयै: प्रदत्त:।

बादरायणव्यासपुरस्कारे उतरीयवस्त्रम्, अभिनन्दनपत्रम्, एकलक्षरूप्यकाणि च प्रदीयन्ते।

नेपालमहोदया: अगस्तमासस्य त्रिंशत् दिनांके 1979 इति ईशवीयाब्दे नेपालराष्ट्स्य ललितपुरम् इति स्थाने जन्म प्राप्तवन्त:। इमे महोदया: जानकीशतकम् इति नाम्ना खण्डकाव्यं रचितवन्त:। न्यायसिद्धांजना इति ग्रन्थस्य रत्नपेटिकासहितसम्पादनं कृतवन्त:। अनेकानि शोधपत्राणि, आलेखा: च प्रकाशितानि। एते न केवलं साहित्यशास्त्रे अपितु दर्शनशास्त्रे अपि नितान्तप्रसिद्धा: सन्ति।

# कनिष्ककटारियामहोदयेन संघलोकसेवायोगपरीक्षायां प्रथमं स्थानं लब्धम्

संघलोकसेवायोगेन आयोजिताया: भारतीयप्रशासनिकसेवाया: परीक्षाया: परिणाम: शुक्रवासरे आगत:। परीक्षायाम् अस्यां राजस्थानस्य राजधान्या: जयपुरस्य कनिष्ककटारिया प्रथमं स्थानं अलभत। तेन प्रथमप्रयासे एव परीक्षा इयम् उत्तीर्णा। एतस्य पिता अपितु राजस्थानसर्वकारे भारतीयप्रशासनिकसेवाया: अधिकारी वर्तते।



स: भारतीयप्रोद्योगिकीसंस्थानबोम्बे इति संस्थानात् तकनीकीस्नातकं भूत्वा अमेरिकादेशे एककोटिवार्षिकीयायं स्वीकृत्य कार्यं कृतवान् किन्तु वृत्तिसंतुष्टिं न प्राप्य भारतमागत्य भारतीयप्रशासनिकसेवाया: सज्जां कृतवान्।

परीक्षायां प्रथमदशस्थानेषु चत्वार: अभ्यर्थिन: राजस्थानप्रान्तस्य वर्तन्ते। प्रथम-द्वितीय-चतुर्थ-षष्ठस्थाने राजस्थानस्य अभ्यर्थिन: सन्ति।

परीक्षाया: सफलताया: रहस्यविषये यदा पत्रकारै: प्रश्ना: पृष्टा: तदा तेन कथितं यत् मया दशहोरायावत् प्रतिदिनम् अध्ययनं सम्पादितम्। सोशलमीडिया इति जनसंचारमाध्यमात् दूरी सर्वदा मया कृता। संगीत-पादकन्दुकक्रीडामाध्यमेन मनोरंजनम् अनेन सम्पादितम्। स्वसफलताया: श्रेय: मात्रे, पित्रे, प्रेयस्यै च प्रदत्त:।



**अशोकाहोटलनवदेहल्यां भारतीयसंस्कृतपत्रकसंघस्याध्यक्ष: डॉ. रमाकान्तशुक्ल एवं महासचिव: बलदेवानन्दसागर: राष्ट्रपति सम्मानित उज्जैनस्य उद्भटसंस्कृतविद्वान् केदारनारायणजोशी, कानपुरस्य आचार्य रामशंकरअवस्थी एवं वाराणस्या: प्रो. फुलचन्द्रजैन महोदयानां वस्त्र एवं ग्रन्थार्पणेन अभिनन्दनं कृतवन्तौ**

# सम्पादकीयम्

अयि सुरभारतीप्रणयिनः!

अमरवाणी विजयताम्।

सानन्दमहं विज्ञापयामि यत् सद्य एव भारतसर्वकारेण वर्षत्रयस्य राष्ट्रपतिसम्मानो मनीषिभ्यो प्रदत्तः। सर्वास्वपि भाषासु या भाषाः स्वीकृताः सम्मानाय तासु अनेके संस्कृतस्य विद्वांसः चिताः आसन्। तेषां सुरभारतीसेवनं विलोक्य सर्वकारेण समुचित एव सम्मानोऽदीयत। अस्मिन्नेवावसरे महर्षिबादरायण पुरस्कारा अपि युवसंस्कृतसमर्चकेभ्यः सादरमदीयतेति विज्ञाय मनो मे प्रफल्लमस्ति।

अवसरेऽस्मिन् उपराष्ट्रपतिना महामहिम्ना वैंकेयानायडूमहोदयेन सम्मानितविदुषां समक्षं बहु सुन्दरं भाषणं प्रदत्तम् । तेनोक्तं यत् मातृभाषा एव सुमधुरा भाषा वर्तते। अस्यां भाषायां सम्भाषणेन महानानन्द आयाति। अतः सर्वैरपि कविभिः विद्भिः स्वभाषाः संरक्षणीयाः वर्धनीयाश्चेति। विदुषा वक्त्रा भारतीयसाहित्यप्रशंसनं कुर्वता मनोज्ञमुक्तं यत् भारतीयं साहित्यं दिव्यमस्ति। अस्माभिः स्वसाहित्यं महता परिश्रमेणापि संवर्धनीयम्। साहित्यमस्माकं नेत्रवदस्ति। वैदेशिकसाहित्यन्तु उपनेत्रवदस्ति। यदि नेत्रमेव न स्यात् तर्हि कुत्र उपनेत्रोपयोगः इति।

जितहृदयेन श्रीमता प्रोक्तं यत् जना वदन्ति विना आङ्ग्लभाषां न कश्चिदपि उपरि गन्तुं शक्नोति, मयोक्तं न हि भोः एवं नास्ति ईश्वरः सर्वामपि भाषां जानाति। बहवो महोच्चपदासीनाः नाङ्ग्लकांवेण्टे गताः किन्तु सम्प्रति देशस्य दर्शनीयां सेवां कुर्वाणा वर्तन्ते। अतः जानन्तु सर्वामपि भाषां किन्तु निजभाषां रक्षन्तु इति तैः सप्रेम बहुधा प्रोक्तम्।

अन्ते संस्कृतसंवादपक्षतः अहं प्रार्थये यत् भवन्तो भवत्यश्च सादरं संस्कृतभाषासंरक्षणाय यतन्तामिति।

## वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः।**
**धर्त्तारा चर्षणीनाम्॥2॥**

**अर्थ-पूर्व मन्त्र से इस मन्त्र में 'आवृणे' इस पर** का ग्रहण किया है। विद्वानों से युक्ति के साथ कलायन्त्रों में युक्त किये हुए अग्नि, जल जब कलाओं से बल में आते हैं, तब रथों को शीघ्र चलाने, उनमें बैठे हुए मनुष्य आदि प्राणी पदार्थों के धारण कराने और सबको सुख देनेवाली होते हैं ॥2॥

इस प्रकार साधे हुए ये दोनों किस-किस के हेतु होते हैं, इस विषय का उपदेश अगले मन्त्र में किया है॥

**अनुकामं तर्पयेथामिन्द्रावरुण राय आ।**
**ता वां नेदिष्ठमीमहे ॥3॥**

अर्थ-मनुष्यों को योग्य है कि जिस प्रकार अग्नि और जल के गुणों को जानकर क्रियाकुशलता में संयुक्त किये हुए ये दोनों बहुत उत्तम-उत्तम सुखों को प्राप्त करें, उस युक्ति के साथ कार्यों में अच्छी प्रकार इनका प्रयोग करना चाहिए ॥3॥

उक्त कार्य के करने से क्या होता है, इस विषय का उपदेश अगले मन्त्र में किया है-

**युवाकु हि शचीनां युवा सुमतीनाम्।**
**भूयाम वाजदानाम्॥4॥**

अर्थ-मनुष्यों को सदा आलस्य छोड़कर अच्छे कामों का सेवन तथा विद्वानों का समागम नित्य करना चाहिए, जिससे अविद्या और दरिद्रता जड़-मूल से नष्ट हों।॥4॥

फिर इन्द्र और वरुण किस प्रकार के हैं, इस विषय का उपदेश। अगले मन्त्र में किया है-

**इन्द्रः सहस्त्रदानां वरुणः शंस्यानाम्।**
**क्रतुर्भवत्युक्थ्यः ॥5॥**

अर्थङ्गपहिले मन्त्र से इस मन्त्र में 'हि' इस पद की अनुवृत्ति है। जितने पृथिवी आदि वा अन्न आदि पदार्थ दान आदि के साधक हैं उनमें अग्नि, विद्युत् और सूर्य मुख्य हैं, इससे सब को चाहिए कि उनके गुणों का उपदेश करके उनकी स्तुति वा उनका उपदेश सुनें और करें, क्योंकि जो पृथिवी आदि पदार्थों में जल, वायु और चन्द्रमा अपने-अपने गुणों के साथ प्रशंसा करने और जानने योग्य हैं, वे क्रियाकुशलता में संयुक्त किये हुए उन क्रियाओं को सिद्धि करानेवाले होते हैं ॥5॥

यह बत्तीसवाँ वर्ग समाप्त हुआ।

फिर उन दोनों से मनुष्यों को क्या-क्या करना चाहिए, इस विषय का उपदेश अगले मन्त्र में किया है-

# पञ्चाशिकात्रयसमीक्षण्

-डॉ.सञ्जयकुमारचौबे
दिल्ली

आ प्राचीनकालादद्यावधि वहव्यो रचना रचनाकाराश्च सञ्जाताः। सम्प्रत्यपि जायमानाः सन्ति। संस्कृतसाहित्यश्रियं वर्धयितुमग्रेसरा मृदुभावसम्पन्नाः प्रतिभाशालिनो नैकेऽपि कवयोऽद्य विलसन्ति। तेषु अरविन्दनामधेयः कश्चित् वरेण्यो युवकविर्वर्तते। अयं सुकविः समाजस्य विविधविषयानाश्रित्य आशु एव सरसां कवितां रचयति। अस्य काव्यरचनाचातुरी अत्यन्तमेव विलक्षणा विद्यते। प्रसादगुणसम्पनमस्य काव्यं सहृदयानचिरमेवाकर्षयति। वस्तुतः यत्काव्यं यावल्लोकं स्पृशति तावदेव सुचिरं तिष्ठति जनमानसे। सम्प्रत्यस्य कवेः पञ्चाशिकात्रयं प्रकाशयत इति विज्ञाय चेतो नन्दति। अत्र काव्यपुस्तके मातृपञ्चाशिका मित्रपञ्चाशिका शवसुरालयपञ्चाशिका चेति तिस्रः पञ्चाशिकाः सन्ति। तत्राद्यायां मातृपञ्चाशिकायां कविः शिखरिणीच्छन्दसि स्वमातरं संस्मर्य तां प्रत्यनुरागं प्रकटयति। अशेषोऽपि लोको जानाति यन्मातुः स्वसन्ततावकृत्रिमानुरक्तिर्भवति। मातृविरहितं जीवनं निर्गन्धपुष्पवदेव जायते। अतस्तन्महत्त्वमाश्रित्यैव विविधभाषायां बहूनि काव्यानि विरचितानि। संस्कृतसाहित्येऽपि अभिराजराजेन्द्रमिश्रप्रभृति महाकवीनां मातृविषयकं काव्यं विश्रुतं वर्तते। वस्तुतोऽत्र पञ्चाशिकायां मातुरुपस्थित्या कीदृशं वातावरणमासीत्, तद्विरहिते गृहस्य कीदृशी दशा सञ्जाता, तस्याः कवौ कियती प्रीतिरासीत्, कियान् संस्कारस्तेन लब्धः, सा कथं रोगाक्रान्ता कालकवलितेति सर्वं कविना प्रकटीकृतम्। सानुरागा मातुश्चिन्ता दूरदेशादागमनकाले कीदृशी आसीदिति संस्मरन् कविर्लिखति-

कदा गन्त्री दिल्ल्यां प्रियसुत तवेयं प्रचलिता
सिवाने चागन्ता तदनु मतिधानी प्रवद माम्।
किमिच्छा ते भोक्तुं सपदि किल पक्ष्यामि मधुरं
विनाम्बां त्वां रावो विशति नहि कर्णे मम कथम्।।9।।

बाल्यकाले मातुर्मुखात् रामचारितादीनां सुखदश्रवणं स्मृत्वा कविः स्वस्मिन् कतिपयरघुकुलगुणानां सन्निवेशं सालङ्कारं प्रस्तौति। तद्यथा-

स्मराम्येतत् सर्वं सुखदसदने रामचरितं
श्रुतं चास्याद् बाल्ये मृदुलयमुपेतं श्रुतहरम्।
अहो ते पुत्रेऽस्मिन् रघुकुलगुणा नैव सकलाः
समायाताः केचित् नहि लघुघटे सागरजलम्।।18।।

प्रज्ञावानयं विश्वसिति यद् वैद्याः जटिलमपि रोगं दूरीकुर्वन्ति, परं नेदं याथार्थ्यं विस्मरति यल्लोके महान्तोऽपि विभूतयः मृत्योरतिथयो भवन्ति। यथोक्तम्-

गतो राजा रामो निखिलजनसेव्यो सुकृतिमान्
प्रयातः श्रीकृष्णः श्रुतमतिरविर्भारतभुवः।
महावीरो बुद्धः ऋषिमुनिवराः निर्जितयमाः
प्रपूर्णे हे मातर्निजवयसि मृत्योरतिथयः।।37।।

अधुना पद्यमिदं प्रेक्ष्य महाकविनीलकण्ठदीक्षितस्य शान्तिविलासस्य पद्यं स्मर्यते यत्र स कथयति यत् कालः सर्वानपि कवलीकरोति। यथोक्तम्-

येनाचान्ताः सलिलनिधयो येन सृष्टा प्रतिद्यौः
शस्त्राण्यस्त्राण्यपि कवलितान्येकया यस्य यष्ट्या।
कस्तादृक्षः प्रभवतु जनो देवभूदेववर्गे
कालः कीटानिव कवलयामास तानप्ययन्नम्।। (शान्तिविलासः)

कविमते पूर्णे आयुषि तृणाघातादपि निधनं जायते न तत्र कश्चित् विशिष्टो हेतुः। (42)

कवेः काव्यमिदं वस्तुतः कारुण्यपरिपूरितं नैकधाश्रूणि विमोक्तुं विवशीकरोति। हा हन्त कीदृशी दैवगतिर्भवति। बाल्ये यस्मिन् मातुरङ्के जनो क्रीडति यदि तस्यैव पुरः स दग्धो जायेत तदा कीदृग्दशा स्यात्। कविरेनामेव पीडामभवति। तद्यथा-

मुदा यस्मिन्नङ्के जननि कृतवान् क्रीडनमये
शिशुर्बाल्ये लीनः मृदुविमलशाटीपटतटे।
तवाङ्कोऽसौ दग्धः सुतकरकृशानौ सुखभरः
श्मशाने तीर्थेऽस्मिन् सपदि तनये पश्यति मयि।।46।।

मातृपञ्चाशिकानन्तरं कविना मित्रपञ्चाशिका व्यलेखि। यथा प्रास्ताविके सूचितं यदेकस्मिन्नेवदिवसेऽस्याः रचना जाता। विषयवर्णनानुरूपं भुजङ्गप्रयातच्छन्दसोऽत्र प्रयोगो वर्तते। यतोहि कविः काव्येऽस्मिन् प्रायशः कृतघ्नमित्राणामेव कृत्यजातं दिग्दर्शयति। सुभाषितपद्येषु मित्रमहिमा कुमित्रनिन्दा बहुशोऽवलोक्यते किञ्चात्रानुपकारकर्मनिष्णातानामेव वर्णनं विद्यते। वस्तुतोऽद्यत्वे स्वार्थपरायणे लोके मित्रतापि कलङ्किता। तस्य वास्तविकं मूल्यमनुदिनं क्षीयते। अत एव कविः व्यथितान्तरात्मा सन्नात्मानमेव पुरतो निधाय कृतघ्नमित्राणां विविधव्यवहारवर्णनं विदधाति। तस्य चेतः तथ्येनानेन दुनोति यत् सः मित्रस्य लघुघटनायामपि तत्कृते सुखस्यावसरं ददाति किन्तु तन्मित्रं तत्सुखस्यावसरे खिन्नचेता जायते। यथोक्तम्-

गृहे ते विडाली प्रसूते विडालं
न वर्धापनं किं ददे मित्र तुभ्यम्।
परं हस्तिनी शावकं मे प्रसूते
तदा त्वं दुनोषीव जाने सुमित्र।।15।।

कविः कीदृशः सखा स्यादिति सम्यग् ब्रुते। यथा-

परित्रायते यः स्वमित्रं कुमार्गात्
मुदा योजयन् धर्ममार्गे विनिद्रः।
प्रसन्नाननो हीयमानोऽपि वाचा
करोति प्रियं कार्यमेवं सखासौ।।42।।

तद्दृष्ट्या रामसुग्रीवयोरिव मैत्री कलौ न दृश्यते। सर्वत्र पृथ्वीराजजयचन्दयोरिवावलोक्यते।43। क्वचित् सः प्राक्तनसरणिं तिरस्कृत्य पतिपत्न्योः पितापुत्रयोः गुरुशिष्ययोः पारस्परिकीं मित्रतामेव मित्रत्वेन स्वीकरोति। यथा-

प्रियायाः सुमित्रं पतिश्चैव पत्युः
सुमित्रं कलत्रं पितुः पुत्र एव।
पिता पुत्रकस्य गुरुः शिष्यकस्य
ततोऽन्यो न मित्रं न मित्रं न मित्रम्।।47।।

असौ कविः मित्रपञ्चाशिकानन्तरं श्वसुरालयपञ्चाशिकां प्रस्तौति।

आसारे खलु संसारे सारः श्वसुरमन्दिरम्। हिमालये हरः शेते हरिः शेते महोदधौ।।

इति पद्याद् विश्रुतमिदं तथ्यं यल्लोके यत्किञ्चिदपि सारभूतं तत् श्वसुरगृहमन्दिरमिति। वस्तुतः हास्यप्रसङ्गे कदाचिदस्य रचना सञ्जाता स्यात् किन्तु कवेः श्वसुरालयपञ्चाशिकायाः रचना काचित् प्रयोजनीभूता प्रतिभाति। यतोहि मातुर्निधनानन्तरं श्वसुरगृहमेव तं नन्दयति। स कृतघ्नमित्रवदपि नास्ति यतो यस्य लवणं खादति तस्योपकारमपि स्मरति। मन्ये तथ्यमिदं रचनायाः कारणीभूतं स्यात्। अस्तु। अस्यां पञ्चाशिकायामेकपञ्चाशत् पद्यानि द्रुतविलम्बितच्छन्दसि निबद्धानि सन्ति। सर्वाण्येव भावगरिम्णा परिपोषितानि सुललितानि सन्ति। कविदृष्ट्या श्वसुरालयः कीदृशः सुखदो भवतीति दर्शनीयः। तद्यथा-

मिहिरतापहरो विधुशैत्यदो
गिरिजचन्दनसौरभसागरः।
घनविमुक्तविशुद्धजलोपमो
हरति कं न जनं श्वसुरालयः।।3।।

कविः श्वसुरालयस्थानां श्वसुरश्वश्रूश्यालीश्यालश्यालकलत्रादीनां सर्वेषामपि जामातारं प्रत्यव्याजस्नेहं प्रकटयति। अत्रामृतानन्दो मधुपानं विनैव लभते। यथा-

भुवि निपीय रसं मधुरं बुधो
ननु जनो लभतेऽमृतनन्दनम्।
तदुपमं श्वसुरालयसंस्थितो
लभत एव विना मधुपानकम्।।12।।

अयं श्वसुरालयः वृद्धविधातुर्नवीनदृष्ट्याः सुखदः परिणामः यत्र वराः प्रसन्नतां लभन्ते। यथा-

अये विधे तव दृष्टिरहो नवा
पालितकेश विवृद्धतनो न किम्।
विरचितः श्वसुरालय एष ते
सुखयतीव न कं वरमागतम्।।13।।

श्यालभार्यायाः मनोहरं वचः मदयति। श्वसुरालयस्यापरोऽपि पक्षः वर्तते यदत्र युवजनानामेव प्रभूतः सत्कारः न खलु वृद्धानाम्। यथोक्तम्-

गिरति यस्य वयस्तु यमः कविः
न सरतात् स जनः श्वसुरालयम्।
उपवनेऽपि तरुर्नहि शोभते
मृतफलः प्रवदन्ति विचक्षणाः।।29।।

अत्र कविः वर्तमानसमाजे प्रचलितां परिपाटीमपि सङ्केतयति। यथा-

कलियुगे सकला किल कन्यका
निजपितुर्गृहमेव विवाहिताः।
अभिलषन्ति गृहं न निजं प्रभो
न पतयो गृहिणीवशवर्तिनः?।38

अस्य पद्यस्यान्ते काक्वाक्षिप्तो भावः पत्युः व्यथामभिव्यञ्जयन् काम्प्यलौकिकीं चमत्कृतिं वितनोति।

इत्थं त्रिष्वपि काव्ये मनोहारि वर्णनं विद्यते। भावभाषागुणालङ्कारदृष्ट्या काव्यत्रयमपि सहृदयान् मोदयतीति मे द्रढीयान् विश्वासः। काव्यस्यास्य प्रकाशनावसरे भगवन्तं विश्वनाथं प्रार्थयामि यदिदं सर्वेषां चेतांसि हरेत्। सुचिरं च लोके कविकीर्तिं तनुयादिति शम्।




प्रकाशक
एजुकेशनल बुक सर्विस
एन- 3/25 डी के रोड.
उत्तमनगर, नई दिल्ली
प्रकाशन वर्ष 2018
मूल्यम् 150 रूप्यकाणि

# मिथिलायां वेदाध्ययनपरम्परा

**-विद्यावाचस्पतिः डॉ0सुन्दरनारायणझाः**
सहायक-प्रोफेसर, वेदविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

प्रस्तावना-

विदन्त्येव भवन्तो यदनादिकालाद्वैदिकज्ञाननिधीनामविच्छिन्ना धारा विश्वस्मिन् सर्वत्राबाधगत्या प्रवहती सती अद्यावधि यावद्यथावद्रूपेण प्रवहमाना दृश्यते। अस्याः धारायाः प्रवहणे विभिन्नर्षिमहर्षीणां, तपःपूतान्तःकरणानां मनीषिणां, विद्यावतां विदुषां, धर्माचरणशीलवतां राज्ञां, परिश्रमशालिनां जनानां, तत्तत्क्षेत्राणाञ्च महद्योगदानमस्तीत्यत्र नास्ति लेशतोऽपि सन्देहस्यावसरः।

वेदानामानन्त्यमस्माभिश्श्रूयते पठ्यते च समुपलब्धेषु श्रौतग्रन्थेषु। तदुक्तं तैत्तिरीयेण- भरद्वाजो वै त्रिभिरायुभिर्ब्रह्मचर्यमुवास। तꣳ ह जीर्णꣳ स्थविरꣳ शयानमिन्द्र उपव्रज्योवाच- भरद्वाज! यत्ते चतुर्थमायुर्दद्यां किमनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच। तꣳ ह त्रीन् गिरिरूपान् विज्ञातानिव दर्शयाञ्चकार। तेषां हैकैकस्मान्मुष्टिमाददे। स होवाच- भरद्वाजेत्यामन्त्र्य वेदा वा एते। अनन्ता वै वेदाः। एतद्वा एतैस्त्रिभिरायुभिरन्वोचथाः। तादृशा वेदा न हीदानीमनन्ताः समुपलभ्यन्ते। तदुच्यते यदनन्ता ये ज्ञानराशयो वेदास्सन्ति तेषां सर्वेषामेक एव नामासीद्वेद इति। तस्यैवैकस्य वेदस्यानेकशाखासु विभाजनं कृतं भगवता व्यासेनेति। तदुक्तं दुर्गाचार्येण निरुक्तविवृत्तौ- वेदं तावदेकमतिमहत्त्वाद्दुरध्येयं सन्तं तेषामल्पायुषानल्पग्रहणशक्तिकानां सुखग्रहणाय व्यासेनानेकशाखाभेदेन समाम्नातवन्तः। एवमेक एव वेद आसीत्पूर्वमिति सिद्धं भवति। तदेवेकं वेदं भगवता व्यासेन ऋग्यजुस्सामाथर्वभेदेन चतुर्धा व्यस्य स्वशिष्येभ्यः पैलवैशम्पायनजैमिनिसुमन्तुभ्यः समुपदिष्टमिति। कालक्रमेण त एव चत्वारो वेदाः शिष्यप्रशिष्यपरम्परया चानेकशाखाप्रशाखादिभिस्सम्पन्नाः सन्तः पतञ्जलिकाले एकत्रिंशदुत्तरशताधिकसहस्रासु (1131) शाखासु विभक्ताः समुपलब्धाः पठनपाठनप्रक्रियायां प्रचलिताश्चासन्। तस्मादेव कारणान्महाभाष्यकाराणामियमुक्तिरस्ति- एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः। एकविंशतिधा बह्वृचं नवधा आथर्वणो वेदः। अनेनेदं स्फुटं विज्ञातं भवति यद्वेदाः सन्त्यनन्ताः परं कालक्रमानुसारं तेषां सङ्कोचविकासौ भवतः। वेदविद्यायाः सङ्कोचकारणादेव महर्षिपतञ्जलिकाले सहस्राधिकमेकत्रिंशदुत्तरैकशताधिकं शाखाः समुपलब्धा आसन्। साम्प्रतिके काले पतञ्जल्युक्तशाखास्वप्यत्यन्तन्यूना एव शाखाः समुपलभ्यन्ते। मन्ये यदन्यासां शाखानां विलोपो जातः। तत्र बौद्धजैनमुगलांग्लानामुत्पातजनितानि सन्त्यनेकानि कारणानि वेदविद्याविध्वंसनिमित्तानि समक्षमस्माकं विद्यमानानि। तदन्विहार्यजनतासन्त्रासाद्वेदानामनेकाः शाखा विलुप्ताः सञ्जातेति दार्ढ्येन शक्यते वक्तुम्।

भारतभुवि वैदिकी धारा-

पराशरसत्यवतीसूनोः कृष्णद्वैपायनस्य महर्षेर्भगवतो व्यासस्य चत्वारो शिष्याः पैलवैशम्पायनजैमिनिसुमन्तवश्चासन्। तेभ्यो सौकर्येण वेदानामवगाहनं यथा स्यात्तद्दृष्ट्या विचिन्त्य यज्ञकर्मानुसारं ब्रह्मपरम्परया प्राप्तानां सकलवेदमन्त्राणां विभाजनं कृत्वा भगवता व्यासेन चतुर्भ्यः शिष्येभ्यः क्रमशो ऋग्यजुस्समाथर्ववेदानामुपदेशः कृतः। तदुक्तञ्चापि-

तदृग्वेदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामुत।
अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः।।

पैलाय होतृकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्य ऋग्वेदस्य, जैमिनये उद्गातृकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्य सामवेदस्य, वैशम्पायनायाध्वर्यवकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्य यजुर्वेदस्य, सुमन्तवे च ब्रह्मकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्याथर्ववेदस्योपदेशः कृतः। चतुर्ष्वप्येतेषु व्यासशिष्येषु महर्षेर्वैशम्पायनस्य शिष्य आसीद्योगीश्वरो याज्ञवल्क्यः। कदाचित्कस्माच्चिदपि कारणात्क्रुद्धो वैशम्पायनः स्वशिष्यं याज्ञवल्क्यम्प्रति मदधीतां विद्यां त्यज इत्यादिष्टवान्। गुरोराज्ञामनुपालयता याज्ञवल्क्येन योगबलादुद्वमनेन तां विद्यां मूर्त्तरूपेण तत्याज। याज्ञवल्क्यत्यक्तां तां मूर्त्तां विद्यां वैशम्पायनस्यान्ये शिष्यास्तित्तिरो भूत्वा भक्षितवन्तः। तस्मादेव कारणात्तानि यजूँषि कृष्णयजुर्वेदेन तैत्तिरीयशाखात्वेन चापरेण नाम्ना प्रसिद्धिङ्गतानि। वेदत्यागानन्तरं याज्ञवल्क्यः खिन्नेन मनसेतस्तो भुवि सञ्चरन्तो मिथिलायां समागत्य भगवन्तमादित्यं समाराध्य शुक्लानि यजूँषि प्राप्नोत्। तथा च श्रुतिः- आदित्यानीमानि शुक्लानि यजूँषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते। अत्राह महीधरः- आदित्यादधीतान्यादित्यानि। शुक्लानि शुद्धानि। वाजस्यान्नस्य सनिर्दानं यस्य स वाजसनिस्तदपत्यं वाजसनेयस्तेन याज्ञवल्क्येन शिष्येभ्य आख्यायन्ते कथ्यन्त इत्यर्थः। महर्षेर्याज्ञवल्क्यस्य पञ्चदश शिष्या आसंस्तस्माच्छुक्लयजुर्वेदस्य (जाबालाः, बौधेयाः, काण्वाः, माध्यन्दिनाः, शापेयाः, तापनीयाः, कपोलाः, पौण्ड्रवत्सकाः, आवटिकाः, परमावटिकाः, पाराशराः, वैनधेयाः, गालवाः, कात्यायनाः, बैजवापाश्च) पञ्चदश शाखाः प्रसृता अभूवन्।

याज्ञवल्क्यस्तु मैथिलः-

स च याज्ञवल्क्यो मैथिल आसीदित्यस्मिन्विषये तावत्किञ्चिद्विचार्यते। योगीश्वरेण याज्ञवल्क्येन प्रणीता स्मृतिर्याज्ञवल्क्यस्मृतिरिति नाम्ना प्रथितास्ति। तस्यां याज्ञवल्क्यस्मृतौ श्लोकश्चैषो लभ्यते-

मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन्।
यस्मिन् देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत।।

इत्यनेन स्मृतिवाक्येनेदं स्फुटं भवति यद्योगीश्वरो याज्ञवल्क्यो यदा बहुभिर्मुनिभिर्जिज्ञासितस्सन् धर्मविषयकमुपदेशं कुर्वन्नासीत्तदानीं सः यज्ञिये देशे मिथिलायामेवासीद्यत्र कृष्णो मृगः स्वाभाविकरूपेण सर्वदा विचरति। भगवता मनुना यज्ञियदेशस्य लक्षणमित्थं प्राह-

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः।।

आभ्याम्मनुयाज्ञवल्क्ययोर्वचनाभ्यामिदं सिद्धमेव यन्मिथिला यज्ञियो देशोऽस्ति। श्रूयते यत्पुरा क्षीरसागरो यत्रासीत्तत्रैवाधुना मिथिलादेशः सुस्थितो वर्तते। क्षीरोदधेः स्थानविषये पुराणेष्वेवंभूतानि प्रमाणानि समुपलब्धानि भवन्ति। यथा- क्षीरोदधेर्योत्तरतो हि द्वीपः श्वेतः स नाम्ना प्रथितो विशालः।। एतस्मादेव क्षीरोदधेः सकाशात् सागरं भित्वा धौतामलशिलातलः समुत्थितोऽभवत्। तस्मिन्नेव सरसि गजग्राहयोर्युद्धः सञ्जात इति वामनपुराणस्य गजेन्द्रमोक्षाख्याने वर्णितोऽस्ति। तद्यथा- क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः। उत्थितः सागरं भित्वा देवर्षिगणसेवितः।। तस्मिन्सरसि दुष्टात्मा निगूढोऽन्तर्जलेशयः। आसीद्ग्राहो गजेन्द्राणां दुराधर्षो महाबलः।। यत्र गजग्राहयोर्द्वन्द्वयुद्धोऽभवत् तत्स्थानं हरिहरक्षेत्रनाम्ना प्रसिद्धमस्ति यदधुना बिहारप्रान्तस्य सोनपुरस्थाननाम्ना प्रसिद्धमस्ति। अतिप्राचीनकालादेवात्र हरिहरक्षेत्रमेलापकस्यायोजनं भवति। साम्प्रतमप्यत्र जनाः प्रभूतमात्रायां समागत्य सश्रद्धं सोननद्यां स्नानादिकं कृत्वा स्वात्मानं धन्यं कुर्वन्ति। एतेनेदं ज्ञायते यद्यत्राधुना सोनपुरस्थानमस्ति तत उत्तरस्यां दिशि हिमालयो नाम नगाधिराजो यो हि श्वेतद्वीप उच्यते तस्यारम्भ आसीदिति। कालक्रमानुसारं पृथिव्याः भौगोलिकी स्थितिः परिवर्तिता भवतीति वैदिकः सिद्धान्तो मान्यश्चाधुनिकवैज्ञानिकसिद्धान्तैः। तस्मादेव प्रभावाद्यत्र पूर्वं सागर आसीत्तत्राधुना नगरं यत्र च पूर्वं नगरमासीत्तत्राधुना सागरो विद्यते। वैदिककाले प्रभूतजलयुक्ता प्रवहमाना विशाला च सरस्वती नदी नैव साम्प्रतिके काले दृग्गोचरी भवति। अनेकाः प्राक्तनाः स्थितयो न साम्प्रतं तथाविधाः परिदृश्यमाणास्सन्ति। अत एव चिन्त्यते यद्वेदेषु पुराणेषु च येषां रहस्यानां महत्त्वपूर्णं वर्णनमुपलब्धमस्ति तेषां समस्तानां तथ्यानामवगाहनं यथा स्यात्तथाविधः समुचितः प्रयासः खल्वस्माभिः कर्त्तव्यः। तस्मिन् परिप्रक्ष्ये मयाऽधुना मिथिलायामबाधगत्या या वैदिकी परम्परा प्रचलिताऽऽसीत्तस्मिन्विषये तावत्किञ्चिद्विचार्यते।

मिथिलायां प्रचलिता वैदिकी परम्परा-

शतपथब्राह्मणानुसारं महर्षेर्गौतमस्य शिष्यो मथोः पुत्रो विदेघो नाम राजाऽऽसीद्यस्य मुखे वैश्वानरोऽग्निः प्रकटो भवतिस्म। कदाचिद् गौतमो विदेघश्चोभौ सरस्वत्यास्तटे भ्रमणं कुर्वन्तौ आस्ताम्। तदानीं गौतमेन पृष्टः सन् विदेघो न किमप्युत्तरयतीति दृष्ट्वा गौतमो राज्ञो विदेघस्य मुखे स्थितमग्निमनेकैः ऋङ्मन्त्रैः वीतिहोत्रं त्वा कवे , उदग्ने शुचयस्तव , तन्त्वा घृतस्नवीमहे इत्यादिभिस्तुष्टाव। गौतमो यदा ह्यन्तिमे मन्त्रे घृतशब्दस्योच्चारणं कृतवान् तदा वैश्वानरोऽग्निः घृतकीर्तौ तन्मुखादुज्जज्वाल। विदेघस्तमग्निं स्वमुखे धारयितुं न सक्षमोऽभवत्। फलतस्तन्मुखादग्निः विनिर्गतः सन् पृथिवीं प्राप्तवान्। माथवः (विदेघः) तापशमनाय तदानीं सरस्वत्यां नद्यां निमग्नोऽभूत्। तदानीं सोऽग्निस्तस्मात् स्थानादारभ्य प्राङ् दहन् पृथिव्यां यावत्योऽपि नद्यः सन्ति ताः सर्वा नदीरतिददाह। केवलमुत्तराद्गिरेः सकाशाद्या सदानीरा नाम्नी नदी प्रवहति तां नदीमितरनदीवत् नातिददाह। एवमुक्तप्रकारेण सर्वेषु देशेषु दग्धेषु विदेघः (माथवः) अग्निमेव प्रतीक्ष्योवाच- क्वाहं भवानि? इति पृष्टे सत्यग्निरुवाच- अत एव ते प्राचीनं भुवनम् इति। अर्थादस्याः सदानीरानद्याः पूर्वस्यां या मयाऽऽस्वादिता भूमिरस्ति तत्रैव त्वं निवसत्विति। सोऽयं देशः विगतान्नदीशरीरात् समुत्पन्नस्तस्माद्विदेह इत्युक्तः। विदेघराज्ञः प्रशासने चायं देशोऽग्निना संस्थापितस्तस्मादपि विदेहराज्ञो देशो विदेह इति प्रसिद्धिरस्ति। अत एव साम्प्रतमप्येषैव सदानीरा नदी कोसलदेशस्य च विदेहदेशस्य च मर्यादात्वेन दृश्यते। अनेनाख्यानेनेदं स्पष्टं भवति यद्विदेहदेशो गौतमविदेहयोर्यज्ञानुष्ठानद्वारैव विनिर्मितस्तस्माद्यज्ञियो देशोऽस्तीति।

श्रीमद्योगीश्वरो याज्ञवल्क्यो श्रुतिप्रसिद्धायामस्यां यज्ञियभूमौ विदेहे (मिथिलायां) स्थितस्सन् भगवन्तमादित्यमाराध्य वेदानामध्ययनं कृतवान्। तदारभ्य तेषां पञ्चदश शिष्यास्तदधीतवेदानां प्रचारं प्रसारञ्च चक्रुः। सैव परम्परा साम्प्रतं यावत्किञ्चित्क्वचिन्न्यूनाधिकरूपेण समस्तेऽप्युत्तरभारते प्रचलतीवावलोक्यते। भारतस्य पूर्वोत्तरभागे मिथिलादेशो वर्तते यत्रानेके गौतमयाज्ञवल्क्यादयो महर्षयः कपिलदेवलगोभिलबौधायनपराशरकात्यायनादयो मुनयश्चाभूवन्। राजानोऽपि जनकादयो येषां गुणकीर्तिर्भारतस्येतिहासे गौरवपूर्णं स्थानं बिभर्ति। मनीषिणश्चिन्तकाश्च मेधातिथि-कुमारिल-मण्डन-वाचस्पति-शङ्कर-हलायुध-गङ्गेशोपाध्याय-चित्रधरोपाध्यायादयः सञ्जाताः। येषां कृतयो न केवलं भारतभुव्येवापितु विदेशेष्वपि मान्याः प्रतिष्ठिताः पूजिताश्च सन्ति। अद्यापि तस्मिन् क्षेत्रे तपस्विनो महात्मानो मेधाविनो विद्वांसश्च विलसन्त्यनेके ये विविधगुरुकुलानां सञ्चालनं कृत्वा वेदविद्यायाः प्रचारं प्रसारञ्च कुर्वन्ति। अनेकान्युदाहरणभूतानि गुरुकुलानि मिथिलायां सन्ति यत्र वेदविद्यानामध्येतारो ब्रह्मचारिणस्तिष्ठन्ति वेदादिविषयाणां मूर्धन्या विद्वांसश्च विलसन्ति। मिथिलायां प्रचलितेषु विविधगुरुकुलेषु लगमाग्रामे स्थितस्य ब्रह्मचर्याश्रमस्य नाम गौरवेण स्वीक्रियते। प्रसङ्गवशादिह लगमास्थब्रह्मचर्याश्रमस्य संक्षिप्तपरिचयमुपस्थाप्यते।

लगमाब्रह्मचर्याश्रमस्य परिचयः-

मिथिलादेशस्य विस्तारो भारतवर्षस्य विहारप्रान्तस्योत्तरभू-भागादारभ्य नेपालदेशस्य च प्रसिद्धं स्थानं जनकपुरपर्यन्तमस्ति। तेनेदं विज्ञातं भवति यन्नेपालभारतयोः सीमाप्रान्तभागो मिथिलानाम्ना प्रसिद्धोऽस्ति। विहारप्रान्ते यन्मिथिलादेशक्षेत्रं तत्रानेकानि मण्डलानि समाविष्टानि सन्ति। मण्डलेष्वेषु दरभङ्गामण्डलस्य स्थानमत्युत्कृष्टं वर्तते। विहारप्रान्तस्य दरभङ्गामण्डले लगमाग्रामो विद्यते। तस्मिन् ग्रामे अस्त्येकं सुप्रसिद्धं गुरुकुलं जगदीशनारायणब्रह्मचर्याश्रमसंज्ञकम्। अस्य गुरुकुलस्य संस्थापकाः साकेतवासिनो श्रीजगदीशनारायणब्रह्मचारिमहोदया आसन्। गुरुकुलेऽस्मिन् वेद-वेदाङ्गादिशास्त्राणामध्ययनाध्यापनञ्च भवति। अस्य गुरुकुलस्य स्थापना 1964 तमे वर्षे मईमासस्य 14 दिनाङ्के तदनुसारं वैशाखशुक्लाक्षयतृतीयायां सञ्जाता। अत्र ये ब्रह्मचारिणो वसन्ति तेषां भोजनवस्त्रावासव्यवस्था गुरुकुलेनैव क्रियते। अतिप्राचीनकाले ब्रह्मर्षिवसिश्सान्दीपन्योराश्रमयोर्ये नियमा

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

आसन् त एव एतस्मै ब्रह्मचर्याश्रमाय ब्रह्मचारिमहोदयैः प्रकल्पितास्तेषां नियमानां विधिवत्पालनमद्यापि तत्र भवत्येव। अस्माकं दौर्भाग्यं यत्ते महर्षयः साम्प्रतं सदेहमत्र न विराजन्ते परन्तेषामाध्यात्मिकशक्तिरद्यापि नः कल्याणं जनयति। अस्य महर्षेः स्थूलं शरीरं 2010 तमवर्षस्य दिसम्बरमासस्य 25 दिनाङ्के तदनुसारं पौषकृष्णचतुर्थ्यां तिथौ पूर्णमभवत्। तदनन्तरं तत्प्रदर्शितपथमग्रेसारयन्ति श्रीमन्तो हरेरामदासब्रह्मचारिमहाभागाः।

अस्मिन्नाश्रमे अनेके वेदवेदाङ्गमर्मज्ञा विद्वांसः काशीतोऽधीता व्याकरणशास्त्रपारङ्गताः सनकनन्दनाचार्याः, वेदस्य पारदृश्वानो राष्ट्रपतिसम्मानिताः पं.जगदानन्दझासदृशाः स्वज्ञानवैभवेनाश्रमस्थान् ब्रह्मचारिगणानध्यापयामास। एतस्माद्ब्रह्मचर्याश्रमादधीत्यानेके विद्वांसो देशस्य विविधक्षेत्रेषु गत्वा वेदशास्त्रगौरवमनुदिनमभिवर्द्धयन्ति। एतदतिरिक्तान्यन्यान्यपि गुरुकुलानि मिथिलायां प्रचलितानि सन्ति।

निष्कर्षः- उपर्युक्तविवेचनानुसारमेतत्तु सुस्पष्टमेव भवति यन्मिथिला वैदिककालादारभ्याद्यपर्यन्तं वेदविद्यायाः प्रचार-प्रसारायोत्कृष्टं स्थानमावहति। मिथिलाया एकं नाम तिरहुत इति प्रसिद्धमस्ति। तिरहुतशब्दस्यार्थ भवति तीरे तीरे (गृहे गृहे) हूयते तस्मात् तिरहुत इति। पूर्वमत्र सर्वेऽपि गृहस्थाः प्रतिदिनमग्निहोत्रं कुर्वन्ति स्म। वेदोक्तानामग्निहोत्रादारभ्य सोमपर्यन्तानां यज्ञानामनुष्ठानमत्र गृहे-गृहे भवति स्म। तस्याप्यनेके सन्दर्भाः समुपलभ्यन्ते। लघुकायेऽस्मिन्निबन्धे न तेषां सर्वेषामपि विवेचनं सम्भवमतोऽन्ये निबन्धे मिथिलायाः श्रौतयागपरम्परा इति शीर्षकमनुसृत्य प्रतिपादनं करिष्यामीत्यलमतिविस्तरेण।

जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः। जयतु मिथिलादेशः।

1.तै.ब्रा.- 3/10/11/3-4

2. निरुक्ते- 1/6/20 'बिल्मं भिल्मं भासनमिति वा' इति सूत्रव्याख्यानावसरे। भिल्मं वेदानां भेदनम्। भेदोऽत्र व्यासः। व्यसनं व्यासः।

3. महाभाष्ये पस्पशाह्निके।

4. नाग0 पुरा0 1/4/21

5. ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः।। (ऋग्वेदे- 10/71/11)

6. इत्युक्तो गुरुरप्याह कुपितो याह्यचलं त्वया। विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति।। श्रीमद्भागवते-12/6/63

7. देवरातसुतः सोऽपि च्छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणम्।। श्रीमद्भागवते-12/6/64,

याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधिगवेषयन्। गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम्।। श्रीमद्भागवते- 12/6/66

एवं स्तुतः स भगवान्वाजिरूपधरो हरिः। यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः।।

यजुर्भिरकरोच्छाखा दश पञ्चशतैर्विभुः। जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः।। श्रीमद्भागवते- 12/6/73-74

8. बृहदारण्यकोपनिषदि-5/5/33

9. याज्ञवल्क्यस्मृतौ- 1/2

10. मनुस्मृतौ- 2/23

11. महाभारते- 12/335/8 (शब्दकल्पद्रुमे- 5 भागे, 181 तमे पृष्ठे)

12. वामनपुराणे, गजेन्द्रमोक्षाख्याने-85/5

13. वामनपुराणे, गजेन्द्रमोक्षाख्याने-85/19

14. शु.य.सं.- 2/4, ऋग्वेदे- 5/26/3

15. ऋग्वेदे- 8/44/17

16. ऋग्वेदे- 5/26/2

17. सर्वदा नीरं जलमस्यामस्तीति व्युत्पत्त्या सदानीरा-इत्युच्यते। 'करतोया सदानीरा बाहुदा सैतवाहिनी' अमरकोशे, वारिवर्गे, श्लोकः-33 इत्यस्य पद्यार्द्धः।

गौरीविवाहे कन्यादानजलादुत्पन्ना करतोया सदानीरा चेत्युभयनाम्ना प्रथिता नदी। पुलस्त्यतीर्थयात्रायां स्मृतावुक्तम्-

प्रथमं कर्कटे देवी त्र्यहं गङ्गा रजस्वला। सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी।। इति।

18. शतपथब्राह्मणे- 1/4/1/17

19. शतपथब्राह्मणे- 1/4/1/17

20. शतपथब्राह्मणे- 1/4/1/10-20

# श्रृणु रे नैतिकदुर्जन!

-डॉ.निरञ्जनमिश्र

अयि नवराजविपक्षमहोदय! बुद्धिरियं तव केन कृता
निजकुलसंस्कृतिशोषणकर्मणि शक्तिरियं तव वा निहिता।
निजगृहदाहकनग्नहुताशनदीपनमद्य कथं कुरुषे
निजपुरुषार्जितदिव्ययशोवदनं मलिनञ्च कथं कुरुषे।।

तव पदलाभविलोलुपता विषतरुणीवाद्य नवा रुचिरा
तव हृदयं हरतीह करिष्यति किं न हि जानातीह धरा।
गृहपतिगौरवरक्षितुमिच्छसि चेद्रुचिरं परमद्य गृहं
निजरिपुपक्षगतं विदधातुमये! कुरुषेद्य कथं घटनम्।।

निजबलनाथबलं प्रबलं प्रभवेदिति चिन्तयतीह न यो
खलदलगौरवरक्षणकौतुकमेत्य करोति हितं स रिपोः।
निजजननीपयसा वदनं वहतीह बली रिपुमानहस्
तदितरदुग्धबलेन सुखी भवतीह सदा कुलघातकरः।।

निजजडतामिह मानवतीमनुमीय विनिन्दसि चन्द्रकलां
निजवचनैरिह दर्शयसि स्वयमेव कुलार्जितदुर्बलताम्।
कतिचन दुष्टचरास्तव जीवनकनननाशनधर्मधरा
तव कृपयैव हि जीवन्तो विलसन्ति सदा जयघोषकराः।।

त्यज कपटाश्रितजीवनमद्य निजोच्चगुणं विस्मर मा रे
विषवचनैर्निजगौरवगानकलाकुशली त्वं मा भव रे!
चतुरधुरीणजना जडतां तव जानातीति विचिन्तय रे!
निजवचनं जनतावचनं परिभाव्य न चान्तकमर्चय रे!।।

# प्रयागराजः

डॉ. राजेन्द्र त्रिपाठी 'रसराजः'

यत्र स्थले गतोऽहम्
देशेऽपि वा विदेशे यत्रस्थले गतोऽहम्,
सूर्यस्तथैव चन्द्रो गगनेऽपि संस्थितोऽस्ति।1।

वायुर्जलं धरित्री वह्निर्दिवाऽपि रात्रिः।
एकः स्वरूपवर्णे सर्वत्र संश्रितोऽस्ति।2।

बुद्धिर्मनो विवेको वाचो ध्वनिश्च दृष्टिः।
ब्रह्मैव एकपुरुषः प्रकृतौ स मिश्रितोऽस्ति।3।

देवोऽपि शक्तिमूलस्तस्यैव सर्वसृष्टिः।
सम्पूर्णजीवलोको विधिनैव निर्मितोऽस्ति।4।

पुण्यं किमत्र पापं पुरुषार्थपूरणार्थम्।
स्वार्थं विमुच्य को यः परमार्थतत्परोऽस्ति।5।

जातो जगति जनो यो मृत्युं ध्रुवं स यातः।
ज्ञात्वापि तद् यथार्थं लोकेऽधुना भ्रमोऽस्ति।6।

उच्चोऽस्मि मध्यमो वा दलितः कुतोऽत्र जातः।
आरक्षणे समाजो वर्गेषु वर्णितोऽस्ति।7।

संलक्ष्य भेदभावं शिक्षालयेषु बन्धो! ।
रसराजज्ञानमार्गे लोकोऽपि चिन्तितोऽस्ति।8।

# स्वमार्गं दुर्गमं जाने

-डा. संजयकुमारचौबे

भयान्नाहं निवर्तिष्ये स्वमार्गं दुर्गमं जाने
यते यस्मै, सहे कष्टं पदं तद् दुर्लभं जाने।
जनश्रुत्या न मे संगो न रागः कृत्रिमे लोके
प्रयत्नस्यादरं कुर्वे तदीयं सत्फलं जाने।
प्रसूनं कोमलं शान्त्या: प्रदातुं मे मनो सज्जं
प्रभावं दुर्विनीतानां रुषोऽहं दारुणं जाने।
सुधीराणां धृतिं संधारये पाथेयवल्लोके
सुमार्गे सञ्चलन् नित्यं रिपूणां संहतं जाने।
कथं द्वारे समायाताः सतां वेशेऽद्य लङ्केशाः
नयज्ञाता न्वहं रक्षोहृदिस्थं कैतवं जाने।
समाह्वानं मुधा नो कल्पतां भूयोऽपि निर्वीर्यैः
सृतिं बुद्धस्य मन्वानोऽपि शम्भोस्ताण्डवं जाने।
वचोबाणाग्निसम्पातं प्रकुर्युर्मेऽरयः कामं
चिरं चेतः कथं रक्ष्यं सुशस्त्रं तद्गतं जाने।
कथं नो सञ्जयो जातः कृपापात्रं विशिष्टानां
नवीने चाटुसंसारे सखे तत्कारणं जाने।

# सहस्रबाहुहननम्

-मार्कण्डेयो रवीन्द्रः

त्रिपुण्डभालं मृगचर्मयुक्तं
कोदण्डहस्तञ्च निषंगपृष्ठम् ।
रुद्राक्षकण्ठं नयनाभिरामं
तं पर्शुरामं शिरसा नमामि ।।(1)

बाल्ये च काले शिवपूजनेन
प्राप्तं वरेऽस्त्रं परशुञ्च घोरम्।
तेनैव रामः परशुः प्रसिद्धः
षष्ठावतारः पुरुषोत्तमस्य।।(2)

ग्रन्थेषु गाथा च पुराणशास्त्रे
रामायणादौ खलु मानसे च ।
व्यासस्य वेदे किल भारतेऽपि
चर्चावतारो परमात्मनश्च।।(3)

स्वयंवरे मानसबालकाण्डे
ओजश्च तेजोमयरूपमस्य।
दृष्टञ्च तत्क्षत्रियशत्रुभूतं
राजर्षिहर्म्ये शिवचापभङ्गे।।(4)

भग्नावसाने भवचापचारोः
सौमित्रिणा तेन कृतो विवादः।
रामावतारः पुरुषोत्तमस्य
शान्तो महर्षिः जमदग्निपुत्रः।।(5)

शिष्यश्च भीष्मः परमो हि वीरः
राधेयकर्णो लिखतीति व्यासः।
रञ्जीकृताराजकमेदिनीति
पृथ्वीशरकेन पराक्रमेण ।।(6)

पौराणिका हैहयवंशमाला
तस्याञ्च जातः परमः प्रतापी।
नामार्जुनैकः कृतवीर्यपुत्रः
तेन प्रसिद्धः खलु कार्तवीर्यः।।(7)

माहिष्मतीशासककार्तवीर्यः
विद्याप्रवक्ता च तदत्रिपुत्रः।
वरैरनेकैः गुरुपूजया च
भुजैः प्रसिद्धश्च सहस्रबाहुः।।(8)

वरञ्च लब्ध्वा कृतवीर्यपुत्रः
दानेन यज्ञेन च संयमेन।
भूत्वा च लोकप्रियधार्मिकः स
चकार राज्यं तु सहस्रबाहुः।। (9)

बलेन सार्धञ्च सहस्रबाहुः
किलैकदागच्छदृषेः प्रदेशे।
भवेति देवोऽतिथिरेष राजा
परम्परा भारतपुत्रकाणाम्।।(10)

सर्वाणि भक्ष्याणि नरेन्द्रहेतोः
तृप्ता विशाला चतुरङ्गसेना।
दिव्येति मत्वा खलु कामधेनुः
भिक्षुश्च जातो नृपकार्तवीर्यः(11)

न कामधेनुः ददनं क्षितीश
बभाष चर्चीकसुतः विनीतः।
तथापि मूढः कृतवीर्यपुत्रः
बलादकर्षच्च सहस्रबाहुः।।(12)

कृत्यं कृतं घोरमतीव तेन
श्रुत्वेति पर्शुः जमदग्निपुत्रः।
आज्ञां विनैवाशु जगाम तत्र
तातस्य यत्रार्जुनकार्तवीर्यः।।(13)

युद्धं कृतं तेन च धेनुहेतोः
नैकोऽपि शेषो रिपुपक्षवीरः।
छित्वा च बाहून् कृतवीर्यसूनोः
पर्शोः प्रहारेण वधश्चकार।।(14)

वधञ्च श्रुत्वा कृतवीर्यसूनोः
वीरोऽसि धीरोऽसि पिता जगाद।
नृपस्तु देवो भवतीति नीतिः
कृत्यं न भद्रञ्च कृतं त्वयैतत्।।(15)

दयाक्षमासंयमसत्यशान्ति -
गुणास्तु विप्रेषु निसर्गतश्च।
त्यक्ता वधेनेति सहस्रबाहोः
तीर्थेषु पापस्य विशोधनञ्च।।(16)

नानेकवर्षं पितुराज्ञया स
तीर्थेषु विप्रो भ्रमणञ्चकार।
निवृत्य पापाद्विमलो हि जातः
तपोवनं पर्शुधरो जगाम।।(17)

आकर्ण्य वृत्तं कृतवीर्यपौत्रा
हन्तुं तु पुत्रं जमदग्निपुत्रम्।
यदागताः पर्णकुटी कुमाराः
पिता समाधौ हि तपोधनस्य।।(18)

एकाग्रचित्तं भृगुवंशदीपं
जघान दुष्टाः कृतवीर्यपौत्राः।
कुत्रासि ? पर्शो ! जनको न शेष
चकार शोकं खलु रेणुका च।।(19)

हताश्च पुत्राः प्रथमे हि युद्धे
सहस्रबाहोः कृतवीर्यसूनोः।
राजन्यहीनाञ्च चकार वीरः
वसुन्धरां षोडशपञ्चवारम्।।(20)

# योगस्वरूपसमीक्षा

-डॉ.मारकण्डेयनाथतिवारी
सहाचार्यः, साङ्ख्ययोगविभागे
श्रीलालबहादुरशास्त्रीराष्ट्रिय-
संस्कृतविद्यापीठम्, नवदेहली-16

भारतीयपरम्परायां नवदर्शनानि प्रचलितानि सन्ति। तेषु षडास्तिकसंज्ञितानि त्रीणि नास्तिकसम्मतानि च। येन तत्त्वं दृश्यते तद्दर्शनम्।

सेश्वरसांख्यदर्शनमेव योगदर्शनस्य प्रथमकल्पः। अस्य दर्शनस्य आस्तिकदर्शनक्रमे द्वितीयं स्थानम्। काले प्रणष्टं भगवान् पतञ्जलिरुज्जहारेति योगदर्शनस्य पातञ्जलदर्शनाभिधेयत्वम्। विषयेऽस्मिन् प्राचीनग्रन्थरूपेण पातञ्जलयोगदर्शनमेव लभ्यते यद्यपि तत्र वेदसाहित्ये वैदिकसाहित्ये च योगविषये बहूक्तमस्ति। तस्मिन् योगदर्शने पतञ्जलिमुनिना सूत्रं प्रणीतम्। पतञ्जलिविषये प्रचालितमेकं पद्यमस्ति।

पातञ्जलयोगदर्शनं चतुर्षु पादेषु विभक्तमस्ति - समाधि-साधन-विभूति-कैवल्यभेदेन। समाधिपाते योगस्य स्वरूपमुद्देश्यं लक्षणं चित्तवृत्तिनिरोधोपायस्योपाया विभिन्नयोगानाञ्च विवेचनं कृतमस्ति। तत्र 'अथ योगानुशासनम्' इति सूत्रेण प्रथमपाद आरभ्यते। अथशब्दः स्वरूपेण मङ्गलभूतः , तदुच्चारणमपि मङ्गलभूतम्। अथशब्दोऽधिकारद्योतकः। अधिकारश्चारम्भः। योगशास्त्रमारब्धं वेदितव्यमिति सूत्रार्थः।

अनन्तरं प्रतिपाद्यस्य योगस्य लक्षणमुच्यते- 'योगश्चित्तवृत्तिनिरोधः' इति। योगो नाम समाधि :। तदुक्तं योगवासिष्ठे-

इमं गुणसमाहारमनात्मत्वेन पश्यतः।
अन्तःशीतलता तस्य समाधिरिति कथ्यते।। इति।

युज् समाधौ, अनुशिष्यते व्याख्यायते इति योगः। निर्मलसत्त्वगुणपरिणामरूपस्य चित्तस्य वृत्तीनां बहिर्मुखपरिणतिविच्छेदाद् अन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे चित्ते लयो गयोग इत्युच्यते। योगेनैव मानवस्य चित्तं निर्मलं शुद्धं स्थिरञ्च भवितुमर्हति। योगः सार्वभौमधर्मोऽस्ति। वृत्तिर्नाम चित्तस्य अङ्गाङ्गिरूपतया परिणामः। क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः पञ्च। चित्तं हि कदाचित्क्षिप्तं कदाचिन्मूढं कदाचिद्विक्षिप्तं कदाचिदेकाग्रं कदाचिन्निरुद्धं चेति पञ्चवृत्तिकम्। यदा चित्तस्य केनापि विषयेण सह सान्निध्यं भवति, तदा तत् तस्यैव विषयस्याकारं बिभर्ति। क्षिप्तं नाम तेषु तेषु विषयेषु क्षिप्यमाणमस्थिरं चित्तमुच्यते। क्षिपति वितथीकरोति प्रयत्नमिति क्षिप्तम्। मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धय इत्यत्र कश्चित्पदार्थेतरमूढमनुष्येभ्यो वावर्त्य क्षिप्तावस्थापन्ना यतति सिद्ध्यतित्येवं भगवता निर्दिष्टम्। रजोगुणादस्थिरं बहिर्मुखतया विषयेषु प्रेरितमित्यर्थः। ईदृशं चित्तं प्रायो दैत्यदानवानां सदैव। मूढावस्थायां चित्तः किं कर्तव्यं किमकर्तव्यमिति विवेचनमन्तरेण क्रोधद्वेषादिभिर्विरुद्धकृत्येष्वेव नियमितो भवति। ईदृशं चित्तं प्रायः सदैव रक्षःपिशाचादीनाम्। तत्र मूढावस्था पामराणामविदिताध्यात्मतत्त्वानां पशुतुल्यानां केवलविषयैषिणां भवति। मूढावस्था निराकरणोयत्वेनोपदिष्टा। विदितात्मतत्त्वानां प्रयतमानानामपि प्रबलविषयाक्षिप्तमनसां क्षिप्तावस्था। क्षिप्ताद्विशिष्टं विक्षिप्तम्। सत्वोद्रेकाद् दुःखसाधनं परिहृत्य सुखसाधनेष्वेव शब्दादिषु प्रवृत्तं विक्षिप्तम्। ईदृशं चित्तं सदैव देवानाम्। विक्षिप्तावस्थायां मनो एकस्मिन् विषये न संतिष्ठते। प्रयतमानानां क्षणमवतिष्ठते मनः पुनश्चञ्चलं भवतीत्येवंविधम्।

एतदेव यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्। यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टति तमाहुः परमां गतिम्। तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणम्। अप्रमत्तस्तदा भवति योगो हि प्रभवात्ययौ'' इत्येवं नचिकेतं समुपदिशता यमराजेन क्षिप्तविक्षिप्तयोर्योगत्वेनानुपगमात्। क्षिप्तमूढविक्षिप्तावस्था योगानुकूला न भवन्ति। एकाग्रावस्था निरुद्धावस्था च अवश्यमेव योगानुकूले, तयोः सत्त्वगुणप्रधानत्वात्। एकाग्रावस्थायां चित्तम् एकस्मिन् विषये आरूढं भवति। निरुद्धावस्थायां चित्तस्य सर्वा अपि वृत्तयो लुप्ता भवन्ति तस्मात् चित्तं स्वकीयां स्वाभाविकीं स्थिरां शान्तामवस्थामधिगच्छति। एकाग्रावस्थाया नामान्तरं भवति सम्प्रज्ञातयोगः, निरुद्धावस्थायाश्चापरं नामधेयं भवति असम्प्रज्ञातयोगः। सम्यग् प्रज्ञायतेऽस्मिन् प्रकृतेर्विविक्ततया ध्येयमिति। सम्प्रज्ञातसमाधौ चित्तं ध्येये लीनं भूत्वा तन्मयीभवति। असम्प्रज्ञातसमाधौ सर्वासामपि चित्तवृत्तीनां विषयाणाञ्च तिरोभावः सञ्जायते। असम्प्रज्ञातसमाधिं प्रपन्नो योगी मुक्तो भवति।

चित्तस्य पञ्चवृत्तयः सन्ति। ते प्रमाणविपर्ययविकल्पनिद्रास्मृतयः। अत्रानधिगतार्थनिश्चयाकाशवृत्तिः प्रमाणम्। प्रमाणलक्षणन्तु अविसंवादिज्ञानं तत्करणं प्रमाणमिति।

इन्द्रियद्वारेण बाह्यवस्तूपरागाश्चित्तस्य तद्विषयविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम्। मिथ्याज्ञानं विपर्ययः। अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः। तस्यार्थस्य यद्रूपं तस्मिन् रूपे न प्रतिष्ठति तस्यार्थस्य यत् पारमार्थिकं रूपं न तद् भासयतीति यावत्। अर्थशून्यः केवलकल्पनामयो यः प्रत्यय आहार्यज्ञानरूपः स विकल्पः। विकल्प इत्येतेन पदेन कल्पितं वस्तु समुपस्थाप्यते वस्तुतस्तद् वस्तुनः स्थितिर्न कालत्रयेऽपि दृश्यते।

निद्राख्या चित्तवृत्तिस्तमोगुणप्रधाना भवति। तत्कारणाद् जाग्रत्स्वप्नावस्थयोरनुभवो लीयते। निद्रायां मनः क्रियारतमेव भवति। विषयज्ञानस्य चाभावो जायते। अत इयं वृत्तिरभावप्रत्ययालम्बनेति कथ्यते। प्रमाणेनानुभूतस्य विषयस्य योऽयं असम्प्रमोषः संस्कारद्वारेण बुद्धावुपारोहः, सा स्मृतिः।

निद्रा तु असंवेद्यमानविषया। स्मृतिश्च प्रमाणविकल्पनिद्रानिमित्ता। उक्तानां पञ्चविधानां चित्तवृत्तीनां निरोधोऽभ्यासवैराग्याभ्यां साध्यः। अभ्यासवैराग्याभ्यां यासां प्रकाशप्रवृत्तिनियमरूपाणां चित्तवृत्तीनां यत्प्रतिहननं स निरोधः।

प्रकाशप्रवृत्तिनियमरूपाणां निवृत्तबाह्यविषयसम्बन्धानां अन्तर्मुखतया स्वकारण एव चित्ते शक्तिरूपतया अवस्थानम्। अभ्यासो नाम वृत्तिरहितस्य चित्तस्य एकाग्रतायां यत्नः।

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्। आभ्यामभ्यासवैराग्याभ्यां प्रकाशप्रवृत्तिनियमरूपा या वृत्तयस्तासां निरोधो भवति। तत्र विषयदोषदर्शनजेन वैराग्येण तद् वैमुख्यमुत्पाद्यते। इत्थं ताभ्यामभ्यासवैराग्याभ्यां चित्तवृत्तिनिरोधः कार्यः। एवं चित्तवृत्तिनिरोधपदानां व्याख्यानेन सम्यगुक्तश्चित्तवृत्तिनिरोधलक्षणमेव योगः।

# पलायनविंशतिका

-हेमचन्द्र बेलवालः 'हिमांशुः'
सहायकाध्यापकः संस्कृते
रा०उ०मा०विद्यालयः, घसाड
पत्रालयः- विनायक मुवानी
पिथौरागढम् , उ०ख०

**ग्रामस्थितेभ्यः प्रकृतिप्रियेभ्यो नमोऽस्तु तेभ्यो ह्यपलायितेभ्यः।**
**ग्रामादगतेभ्यो नगरप्रियेभ्यो नमोऽस्तु तेभ्यश्च पलायितेभ्यः।। 1**

**विकासवादेऽपरिहार्यमेतत् पलायनं जातमहो स्वदेशे।**
**शिक्षाचिकित्साव्यवसायलब्ध्यै ग्रामात्समस्ता हि पलायिता हा।। 2**

**ग्रामस्य चिन्तां न करोति कश्चिद् ग्रामस्थितानामियमेव चिन्ता।**
**ग्राम्यैश्चितोऽसौ जननायकोऽपि ग्रामात्त्वरा हन्त पलायते हा।। 3**

**यथा व्यवस्था नगरेशु सन्ति ग्रामे तथा सन्ति न काश्चनापि।**
**तदर्थमेवाद्य पलायमाना ग्रामादहो ग्रामजना अनेके। 4**

**यो जागरूकोऽभवदत्र नेता ग्रामात्स सर्वप्रथमं प्रयातः।**
**तस्यप्रयासैरपरेऽपि केचिद् ग्रामाद्गता हन्त! विवेकवन्तः।। 5**

**ग्रामेऽत्र भूत्वापि कृतिं चरन्तः कर्तु जनास्स्युस्सफलं स्वजन्म।**
**परंच स्वग्रामहितं कदाचिन्नेच्छन्ति हा ग्रामनिवासिनोऽपि।। 6**

**बहूनि सन्तीह तु कारणानि हा बाधकानीव विकासकाले।**
**ग्रामोन्नतौ किं करणीयमास्ते विदन्ति नैतद् बत नेतृवर्गाः।। 7**

**आसन्दिकां केवलमाप्तुकामा भवन्ति नेतार इहाधुना हा।**
**प्रशंसकाश्चापि भवन्ति तेशां, दुर्गन्ध आयाति न दूशितात्किम्? 8**

**भवेत्कथं ग्रामविकासकार्यं निर्मान्ति नीतिं न विचार्य केऽपि।**
**स्वार्थाय हा केवलमद्य लग्नाः पषुस्वभावा खलु नेतृवर्गाः।। 9**

**कर्तव्यमूढा अधिकारिणोऽपि स्वीयप्रतिष्ठां बत विस्मरन्ति।**
**नेतुर्वचःपालनमेव कृत्वा श्वसन्ति नीचाश्श्वगतिं प्रयाताः।। 10**

**हा केचिदेवात्र भवन्ति सन्तोऽधिकारिणो वा जननायका वा।**
**संख्या तु तेशामतिसीमितैव संजीवनी सास्ति यथाल्पमात्रा।। 11**

**भ्रातृस्वभावस्तु समाजपुश्टो नित्यं समाजोन्नयनाय दृष्टः।**
**तत्रापि भेदं जनयन्ति केचिज् जनैश्चिता वै जननायकास्ते।। 12**

**आजन्मषुद्धान् मलिनान् करोति कर्तव्यलग्नानलसान् करोति।**
**ऐक्यं जनानां बहुखण्डकेशु विभज्य हा नृत्यति नेतृवर्गः।। 13**

**विलुण्ठ्य पैतामहकं जनानां वासस्थलं खाद्यमथ प्रभूतम्।**
**स्वीयाधिकारं जननायकास्ते प्रदर्श्य लोकानिह पीडयन्ति।। 14**

**हा डिण्डिमं घोशमिमे वदन्ति स्वकीययात्रासु सुमंचसंस्थाः।**
**जित्वा परं किंचिदपीह कार्यं ग्रामाय कुर्वन्ति न नेतृवर्गाः।। 15**

**अनेकमंचेशु विराजमाना घुष्टं स्ववाक्यं न हि पूरयन्ति।**
**ग्रामार्थघुश्टेन धनेन केचित् स्वकीयकोशं बत पूरयन्ति।। 16**

**नैकाः समस्याः समुपस्थिता हा विलोकये ग्रामविकासकाले।**
**को वा जनो ग्रामविकासकार्यं कुर्याद्विचिन्त्यास्यहमत्र दुःखी। 17**

**समर्थता नेतरि विद्यतेऽद्या-समर्थता चास्ति जनेशु साक्षात्।**
**भेदं न जानामि तदर्थमत्र किं राजतन्त्रं किमु लोकतन्त्रम्।। 18**

**सुखं कदाचित्किल राजतन्त्रेऽप्यासीज्जनानामिह किंचिदेव।**
**वयं समस्ता बत लोकतन्त्रेऽपि जीवमाना बहुदुःखितास्स्मः।। 19**

**विकासकार्यं नगरेशु किंचित् पश्यामि नित्यं जनताप्रयासैः।**
**किंचाधुना ग्रामविकासकार्यं न जायते किंचिदपीति सत्यम्।। 20**

# पुष्पाभिलाषः

-अरविन्दः

चित्वा सुखं दलय मां निजपादयुग्मैः
वा सङ्क्षिपैवमधुना गृहनालिकायाम्।
व्यर्थं न पातय कवे पदलोलुपेषु
सम्प्रार्थये शृणु सखे सुममद्य सत्यम्। 1

दुर्गन्धराशिरहहा बहु चास्ति देहे
यस्यास्य तस्य जननायकजस्य चास्ये।
किं मां निपातयसि हा कुजने जनेऽस्मिन्
हा हन्त पुष्पमचिरं वद मित्र सत्यम्।। 2

मत्सौरभं न सहते खलनायकस्य
दुर्गन्धमद्य वदतो विषदायकस्य।
मां कोमलं कमलपुष्पमये सहर्षं
हा हन्त किं क्षिपसि हे वद मित्र सत्यम्।। 3

सौख्यं ममास्ति बहुकण्टकवृन्दमध्ये
चोद्यान एव न नरे किल पाटलस्य।
यो देशभक्तिरहितः पदलोलुपोऽयं
तस्मिन् कथं क्षिपसि मां वद मित्र सत्यम्।। 4

यो भारतीयवसुधां निजसेवनेन
सिञ्चत्यहो श्रमकणेन विहाय निद्राम्।
तस्मिन् हृदा क्षिपसि मां कुसुमं प्रफुल्लं
हा हन्त किं न नितरां वद मित्र सत्यम्।। 5

पुष्पाभिलाषमिति हे कवयः स्वकाव्ये
निर्वर्णयन्तु मुखरा मुनिनो यथेच्छम्।
कस्मिन् निपातयितुमेव सुमं स्वकीयं
वाञ्छन्ति हन्त हृदयेन वदन्तु सत्यम्।।6

## संस्कृत-पत्रकारितायाः आधुनिक-संस्कृतस्य च सुबहु प्रचारार्थं कृतभूरिश्रमाय बलदेवानन्द-सागर-महोदयाय राष्ट्रपतिसम्मान-प्रमाणपत्र-प्रदानम्

नवदेहली। नवदिल्ल्याम् अशोका-होटेल्-इत्यत्र मासेह्यस्मिन् 4-दिने राष्ट्रपतेः सम्मान-पत्रेण महर्षि-बादरायण-व्यास-सम्मानेन च वरिष्ठाः युवानश्च प्रायेण शताधिकाः विद्वान्सः भारतस्य माननीयेन उपराष्ट्रपतिना वैङ्कय्या-नायडु-महोदयेन सभाजिताः। अवसरेह्यस्मिन् भाषमाणः माननीयः उपराष्ट्रपतिः अब्रवीत् यत् पुरातनानां भारतीय-भाषाणां सम्वर्धनं संरक्षणञ्च साम्प्रतं परमावश्यके स्तः।




अत्रावसरे आकाशवाण्याः दूरदर्शनस्य च सुख्यातः संस्कृत-वार्त्ताप्रसारकः डॉ.बलदेवानन्द-सागरः संस्कृत-पत्रकारितायाः आधुनिक-संस्कृतस्य च सुबहु प्रचारार्थं कृतभूरिश्रमः सन् राष्ट्रपतेः सम्मान-पत्रेण सभाजितोह्यस्ति।

इदमत्र विशेषेण अवधेयमस्ति यत् सागर-महोदयः साम्प्रतमपि व्यक्तिशो वा वैद्युताणविक-सञ्चारमाध्यमैः संस्कृतस्य शिक्षण-प्रशिक्षण-प्रवाहिनीं प्रवाहयति। संस्कृत-पत्रकारिताम् अभिलक्ष्य अमुना महोदयेन संस्कृत-भाषायामेव प्रथमं 'संस्कृतपत्रकारिताः इतिवृत्तम् अधुनातन-स्वरूपञ्च' इति पुस्तकम् अलेखि। इदमपि उल्लेखनीयं यत् जगति प्रथमोह्ययं संस्कृत-वार्त्ता-प्रसारको येन 1994-तमे वर्षे ओगस्ट-मासे 21-विंशे दिने दृश्य-वाहिनीतः [दूरदर्शनात्] प्रथमवारं वार्त्ता-प्रसारणम् आरब्धम्। संस्कृत-शिक्षा-जगतः संस्कृतवार्त्ता-श्रोतृवर्ग-पक्षतश्च सागर-महोदयस्य कृते कोटिशो मङ्गलकामनाः वितीर्यन्ते।

प्रेषकः:- हेमन्त-जोशी, +91 9968 7422 05

## राष्ट्रपतिपुरस्कारेण सम्मानितो जातः प्रो.महावीरअग्रवालः

नवदेहली। प्रो.महावीरअग्रवालस्य जन्म 9 अक्तुबर 1951 तमे वर्षे अभवत्। भवान् 1969 तमे वर्षे श्रीमद्दयानन्दआर्षविद्यापीठगुरूकुलझज्जररोहतकतः व्याकरणाचार्य (स्वर्णपदकम्), 1972 तमे वर्षे गुरूकुलकांगड़ीविश्वविद्यालयहरिद्वारतः संस्कृते एम.ए (स्वर्णपदकम्), गुरूकुलकांगड़ीविश्वविद्यालयहरिद्वारतः वेदशास्त्रे एम.ए. (स्वर्णपदकम्), 1982 तमे वर्षे चौध



रीचरणसिंहविश्वविद्यालयमेरठतः संस्कृते पी.एच.डी एवं 1996 तमे वर्षे संस्कृते अस्मिन्नेव विश्वविद्यालयेन डी.लिट् इत्युपाधि प्राप्तवान्।

भवतः स्नातक व स्नातकोत्तर स्तरे चतुश्चत्वारिंशत् वर्षस्य शिक्षणमेवं अनुसन्धानस्य अनुभवोऽस्ति। भवतां यार्गदर्शने द्विषष्ठिः शोधछात्राः संस्कृतमेवं वैदिकसाहित्यस्य विभिन्न धारायां अनुसन्धानं कृत्वा पी.एच.डी इत्यस्य उपाधिं प्राप्तवान्। भवान् प्रायसः त्रीवर्षाय गुरूकुलकांगड़ीविश्वविद्यालयहरिद्वारस्य कुलसचिव पदे आसन्। भवान् 2013 तः 2016 पर्यन्तं उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपति अपि आसन्।

संस्कृत साहित्यस्य विभिन्न क्षेत्रे विशेषरूपेण वैदिकसाहित्ये भवतां षड् पुस्तकानि प्रकाशितोऽस्ति। भवतां प्रायसः सप्ततिः शोधपत्रं देशस्य अनेकाषु पत्रिकाषु प्रकाशितो जातः। भवान 2006 तमे वर्षे संस्कृतसाहित्ये प्रवन्धनमवधारणाः इत्योपरि एकः वृहद् शोधपरियोजनायां कार्यं कृतवान। भवान् अमेरिका, ब्रिटेन, एवं नेपालस्य शैक्षणिक यात्रा अपि कृतवान्। इदानीं पर्यन्तं भवान् चतुर्दश वारं मञ्चोपरि सम्मानितमभवत्।

## राष्ट्रपतिसम्मानेन सम्मानिताः प्रोफेसरकृष्णकान्तशर्ममहोदयाः

नवदेहली। भगवतो विश्वनाथस्य नगरी काशी विद्याया राजधानी मन्यते। अत्रैव ज्ञानविज्ञानसुरभारती निरन्तरं जाह्नवीव प्रवहतीति जानाति सर्वोऽपि विद्वाननिति। असमप्रदेशस्य कमलाबाडीस्थमाजुल्यां गृहीतजन्मनां काशीहिन्दूविश्वविद्यालयतः संस्कृते उच्चशिक्षां प्राप्तवतां प्रोफेसरश्रीकृष्णकान्तशर्म्ममहोदयानां नाम को नाभिनानाति संस्कृतः? विभिन्नपरीक्षासु योग्यतायै चत्वारि पदकानि चत्वारश्च पुरस्काराः एतैरधिगताः। व्याकरणयोगादिविषयनिष्णाताः आचार्याः श्रीशर्ममहोदयाः श्रीमद्भगवद्गीतायाः समाराधकाः सन्ति। नगरे नगरे ग्रामे ग्रामे ग्रामे ग्रामे विलसतु संस्कृतवाणी इतिवाक्यस्य परिकल्पकानां किं च




समुद्घोषकाणामचार्यवासुदेवद्विवेदिशास्त्रिपादानां संस्कृतमार्गे सादरं चलन्त एते न केवलं मुखाद् गीताश्लोकानुच्चारयन्ति अपितु गीतामार्गमेवानुसरन्तो दृष्टिपथमायान्ति। परोपकारः, औदार्यम्, शिष्यान् प्रति अकारणम् अवर्णनीयः पुत्रवत्स्नेहः, सुरभारतीसमुपासनं चेति गुणाः एतेषां पूज्यानां कर्मसु विराजन्ते।

नाट्यशास्त्रप्रवीणाः वन्द्याः श्रीशर्म्ममहोदयाः निर्ब्याजं संस्कृतं संस्कृतिं च सेवन्त इति वक्तुं शक्यते। अभिज्ञानशाकुन्तलं विक्रमोर्वशीयमिति नाट्यद्वयमपि भवतां निर्देशने कालिदासमहोत्सवे उज्जैने, भारतभवने भोपाले, तथा संगीतनाट्याकादम्यां वाराणस्यामायोजितनाट्यपर्वणि दर्शितमस्ति। भवन्तोऽधुना महामनसां काशीहिन्दूविश्वविद्यालयादाचार्यरूपेण सेवानिवृत्ताः गृहे सन्तः देशे देशान्तरे च संस्कृतं वर्धयन्ति।

आधुनिके कराले कलिकालेऽपि एतादृशाः आचार्याः भारते विलसन्तीति ज्ञात्वा स्वयम् अमरवाणी प्रमोदते। महत्त्वाकाङ्काशून्याः गुरव एते प्रतिदिनं स्वगृहे व्याकरणसाङ्ख्ययोगादिशास्त्राणि निश्शुल्कं काश्यां काशीपण्डितपरम्परावत्पाठयन्ति। प्रतिवर्षं काश्यां स्वधनेन शास्त्रकण्ठपाठप्रतियोगितामायोजयन्ति। येन केन प्रकारेण संस्कृतशास्त्राणां रक्षणं स्यादतः गुरव एते प्रयतन्ते मनसा वाचा कर्मणा विभवेन चेति विभाव्य काशी धन्यतां प्रयाति। भवतां चरितं संस्कृतज्ञानामनुकरणीयमस्ति। यथा मुखे तथा कार्य इति श्रीशर्ममहोदयानां विमलं चरित्रमस्ति। अनेके शिष्याः एतैः निजसर्वविधसहयोगेन उपकृता एतान् नितरां स्मरन्ति श्रद्धया।

धन्या काशी यत्र भवादृशाः कमलपत्रसमानाः संस्कृतसंरक्षकाः शास्त्रसंरक्षकाश्च वर्तन्ते। किं किं वर्ण्यताम्? भवद्भिः वृषभदेवकृतवाक्यपदीयटीकायाः आलोचनात्मकमध्ययनमिति शीर्षकेण पीएच्डीत्युपाधिर्लब्धास्ति। भवतां अनेकप्रशंसितपत्रिकासु पञ्चचत्वारिंशदधिकलेखाः प्रकाशिताः सन्ति। भवतां महत्त्वपूर्णप्रकाशेनेषु ब्रह्मसूत्रचतुस्सूत्रीरहस्यं वर्तते। प्राणायामविमर्शनाम्ना विरचितो ग्रन्थो भवदीयो विलोकनीयो वर्तते। अनेकसंगोष्ठीषु भवतां प्रेरकभाषणानि जनैरद्यापि स्मर्यते। अनेकासु समितिषु भवन्तो वर्तमानाः संस्कृतोत्थानाय बद्धपरिकराः विलोक्यन्ते। उत्तरप्रदेशसंस्कृतसंस्थानेन संस्कृतपुरस्कारो भवद्भ्यः प्रदत्तो वर्तते। भवतां महत्त्वपूर्णप्रकाशनेषु ब्रह्मसूत्रचतुस्सूत्रीरहस्यं वर्तते। प्राणायामविमर्शनाम्ना विरचितो ग्रन्थो भवदीयो विलोकनीयो वर्तते। अन्ये पञ्च पुरस्काराः भवद्भ्यः प्रदत्ता वर्तन्ते। वर्तमानसमये भवन्तः मातंगाया बृहद्देशीत्यस्य प्रथमभागस्य संस्कृतात् हिन्द्यनुवादः कृतो वर्तते द्वितीयभागस्य अनुवादः क्रियमाणो वर्तत इति।

भारतसर्वकारेण भवद्भ्यः भवतां संस्कृतसेवां विलोक्य 2018 इस्वीये महोच्चसम्मानः राष्ट्रपतिसम्मानः प्रदत्त इति श्रुत्वा संस्कृतजगत् मोदाब्धिमवगाहते।

भवन्तो दीर्घायुष्यं लभन्तां, निरन्तरमनेनैव प्रकारेण संस्कृतं सेवन्ताम्, दर्शनशास्त्राणि स्निग्धेन चक्षुषा प्रेक्षन्तामिर्मिति येन देशे देशान्तरे च सुरभारती पुनः पुनः प्रतिष्ठां प्राप्नुयादिति कामयते संस्कृतसमाजः।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,